श्रापप्रकाशकर्म

नीकां स्नावेषांत ग्रंथ

श्रीमते गुरुचरणकमलेभ्यो नमः यत्कृपालेशमात्रेण पुरुषार्थचतुष्टयम् प्राप्यते तमहं वंदे गोविंदं भक्तवत्सलम् १ अनंतगुणसंपन्नम
नंतं भजनप्रियम् अनंतरूपिणं वंदे गुरुमानंदरूपिणम् २ इह खलु परमकारुणिकेन भगवता जैमिनिना [illegible]णा अथातो धर्मजिज्ञासेत्या
दिना द्वादशाध्याय्यां धर्मो विचारितः तत्र वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थो धर्मः यथा यागादिः स हि यजेत स्वर्गकाम इत्यादिवाक्येन स्व
र्गमुद्दिश्य विधीयते तथा हि यजेतेत्यत्र द्वावंशौ यजिधातुः प्रत्ययश्च तत्र प्रत्ययेऽप्यंशद्वयम् आख्यातत्वं लिङ्त्वं च आख्यातत्वं च
दशसु लकारेषु विद्यते लिङ्त्वं च पुनर्लिङ्येव तत्राख्यातत्वलिङ्त्वाभ्यां भावनैवोच्यते भावना नाम भवितुर्भवनानुकूलो भावयितुर्व्यापारविशेषः सा च
द्विविधा शाब्दी भावनाऽऽर्थी भावना चेति तत्र पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः शाब्दी भावना सा च लिङ्त्वांशेनोच्यते लिङ्श्रवणेऽयं मां प्रवर्त्त
यतीति मत्प्रवृत्त्यनुकूलव्यापारवानयमिति नियमेन प्रतीयमानत्वात् यच्च यस्मात्प्रतीयते तत्तस्य वाच्यम् यथा गोशब्दस्य गोत्वम् स च प्रवृत्त्यनुकूलो व्या
पारविशेषो लोके पुरुषनिष्ठोऽभिप्रायविशेषः वेदे तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव न हि वेदः पुरुषनिर्मितः वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्व
कं वेदाध्ययनसामान्यात् अधुनाऽध्ययनं यथा इत्यादिना वेदापौरुषेयत्वस्य साधितत्वात् यः कल्पः स कल्पः पूर्व इति न्यायेन संसारस्यानादि ३
त्वात् ईश्वरस्य च सर्वज्ञत्वात् ईश्वरेणागतकल्पीयं वेदमस्मिन्कल्पे स्मृत्वाऽयं दिशति एतावतैवोपपत्तौ प्रमाणान्तरेणार्थमुपलभ्य रचितत्वकल्प
नानुपपत्तेश्च तत्र पुरुषाभावाल्लिङादिशब्दनिष्ठ एव सा अत एव शाब्दी भावनेति व्यपदिशन्ति सा च शाब्दी भावनांशत्रयमपेक्षते साध्यं साधनं
इतिकर्तव्यतां चेति तत्र साध्याकांक्षायां वक्ष्यमाणांशत्रयोपेतार्थी भावना साध्यत्वेन संबध्यते एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः यद्यपि लिं
ङ्त्वादीनामपि एकप्रत्ययगम्यत्वं समानम् तथापि योग्यताभावान्न तेषां भाव्यत्वेनान्वयः करणाकांक्षायां लिङादिज्ञानं करणत्वेन संबध्यते तस्य
च करणत्वेन भावनोत्पादकत्वेन सन्निकर्षस्येव रूपादिज्ञाने सन्निकर्षात् ऊहरूपादिज्ञानस्येव लिङादिज्ञानात् प्राक् शब्दधर्मभावनाया अभाव राम

यथा रूपादिज्ञानस्योत्पादकत्वे इंद्रियार्थसन्निकर्षस्य करणत्वं नान्तथा भावनायाः उत्पादकत्वे न लिङ्ज्ञानस्य करणत्वमिति भावः

न्या·पु:

व्रीहिप्रयोगेणयथासंस्कारस्यपरदृष्टफलत्वंतद्वदत्रापीतिभावः १

२

णेनेव व्रीहिश्रुतयागस्यसोमार्थत्वेफलभावत्वायं सोमस्यकरणत्वेनान्वयोवक्तव्यः भावनाकरणत्वंचभावनाभाव्यनिर्वर्तकत्वेनेत्युक्तम् नचसोमोऽदृष्टमन्तरेण
फलंजनयितुंसमर्थः ग्रहैर्जुहोतीतिवाक्यविहितहोमेनतस्यसंस्कारभावात् अतोदृष्टद्वारायागस्यसोमार्थत्वमितिनयागेनसोमंभावयेदित्यन्वयःसंभव
तिकरणत्वेनोपस्थितस्यसोमस्यसाध्यत्वेनान्वयानुपपत्तेश्च अथसोमेनयागंभावयेदित्यन्वयः करणत्वेनोपस्थितस्यसोमस्ययागार्थत्वात् तत्रयद्यपि
सोमस्ययागार्थत्वात्यागनिर्वृत्तिरूपदृष्टमेवप्रयोजनंलभ्यतइतिनादृष्टद्वारापत्तिः नापिकरणत्वेनोपस्थितस्यसोमस्यसाध्यत्वेनान्वयानुपपत्तिः करणत्वेनैवा
न्वयात् तथापिअप्राप्तत्वात्भावनाकरणत्वेनान्वितस्ययागस्यसाध्यत्वेनान्वयानुपपत्तिस्तदवस्थैव ननुयजेतेत्यत्रयागस्यनकरणत्वेनापिसाध्य
त्वेनोपस्थितिः तद्वाचकतृतीयाद्यभावात् किंतुभावनायांयागसंबंधमात्रंप्रतीयते यागस्यचभावनासंबंधःकरणत्वेनसाध्यत्वेनचसंभवति तत्र
करणत्वं समादायफलसंबंधः साध्यत्वंतुसमादायप्रणसंबंधश्चस्यादितिचेन्नैवम् यद्यपिभावनायांयागस्यसंबंधमात्रंप्रतीयते तथापिकर
णत्वेनोपस्थितिरस्यांसाध्यत्वेननोपस्थितिःसंभवति विरोधात् तदवपूर्वंयागेनस्वर्गंभावयेदितिकरणत्वेनान्वयेसतिपश्चात्सोमेनयागंभाव
येदितिसाध्यत्वेनान्वयोवक्तव्यः ततश्चवाक्यभेदः नचप्रत्ययाभिहितभावनास्वरूपेयागस्वरूपमात्रमन्वेतीतियुक्तंवक्तुं कारकाणामेवक्रियान्वयात्
तस्मिंश्चसोमस्यनसामानाधिकरण्येनवैयधिकरण्येनवान्वयःसंभवति ननुयजेतेत्यत्रप्रत्ययाभिहितभावनायाःकरणाकांक्षायांयथायागःकरणत्वे
नान्वेतितथेतिकर्तव्यताकांक्षायांसोमस्येतिकर्तव्यतात्वेनभावनायामन्वयोऽस्तु किंमत्वर्थलक्षणयेतिचेन्न सोमेनेतितृतीययाकरणत्ववाचिन्या
सोमस्येतिकर्तव्यतात्वानभिधानात् तत्रयदीतिकर्तव्यतात्वंलक्षणयोच्यतेततोवरंसोमपदेएवप्रकृतिमत्वर्थलक्षणा गुणेत्वन्याय्यकल्पनेतिन्यायात्
अथवेदोवाप्रायदर्शनादित्यधिकरणेक्तासंजातविरोधित्वन्यायेनोत्पत्तिप्रत्ययस्यैवलक्षणेतिचेत् तथापिसोमस्येतिकर्तव्यतात्वेनान्वयानुपपत्ति
सिद्धस्यवस्तुनइतिकर्तव्यतात्वाभावात् क्रियामात्रस्यैवेतिकर्तव्यतात्वात् द्रव्यस्यकेवलमंगत्वात् अतएवेतिकर्तव्यतात्वाभावात् द्रव्यस्यप्र राम २

2

तत्र तदुद्देशेन गुणमात्रविधानम् यथा दध्ना जुहुयादित्यत्र होमस्याग्निहोत्रे [illegible] जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानम् दध्ना होमं भावयेदिति

प्रसंगात् किं तु भावनाभाव्या [illegible] भावनां निर्दिशन्ति कुठारस्य छेदनम् अतो लिङादिज्ञानस्य करणत्वेनान्वयः इतिकर्त्तव्यताकांक्षायां

प्राशस्त्यज्ञानमितिकर्त्तव्यतात्वेन संबध्यते तच्च प्राशस्त्यज्ञानं वायुर्वै क्षेपिष्ठा देवतेत्यर्थवादैर्जन्यते तेऽप्यर्थवादाः स्वार्थप्रतिपादने प्रयोजनमलभमाना लक्षणया

क्रतोः प्राशस्त्यं प्रतिपादयन्ति स्वार्थमात्रपरत्वे आनर्थक्यप्रसंगात् न चेष्टापत्तिः अध्ययनविध्युपात्तत्वेनानर्थक्यानुपपत्तेः तथा हि स्वाध्यायोऽध्येतव्य इत्यध्ययन

विधिः सकलवेदस्याध्ययनकर्त्तव्यतां बोधयन् सर्वो वेदः प्रयोजनवदर्थपर्यवसायीति सूचयति निरर्थकस्याध्ययनानुपपत्तेः स च वेदः विधिमंत्रनामधेय

निषेधार्थवादात्मकः तत्र विधिः प्रयोजनवदर्थविधानेनार्थवान् स चाप्राप्तमर्थं विधत्ते यथाग्निहोत्रं जुहुयात्स्वर्गकाम इति विधिरप्राप्तप्रयोजनवद्धोमं विध

त्ते अग्निहोत्रहोमेन स्वर्गं भावयेदित्यर्थः यत्र तु कर्म प्रकारान्तरेण प्राप्तं तत्र विशिष्टं विधत्ते तदुक्तम् न चेदन्येन शिष्ट इति शिष्टानुपदिष्ट इत्यर्थः यथा सो

मेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानम् सोमवता यागेनेष्टं भावयेदिति० न चोभयविधाने वाक्यभेदः विशिष्टस्यैकत्वात् वि

शिष्टविधौ च मत्वर्थलक्षणा यथा सोमपदेन मत्वर्थो लक्ष्यते सोमवतेति न हि मत्वर्थलक्षणां विना सोमस्यान्वयः संभवति यदि तावत्सोमयागयोरेकरूपे

ण भावनायां करणत्वेनान्वयः सोमेन यागेनेष्टं भावयेदिति तत उभयविधाने वाक्यभेदः सोमस्य यागस्य च तत्फलभावनायां करणत्वेनान्वये प्रधानाय

त्तिश्च यागार्थत्वात् यपत्तिश्च यागेद्रव्यानुपपत्तिश्च प्रत्ययवाच्यफलभावनायाः समानपदोपात्तेन यागेन करणाकांक्षायाः निवृत्तत्वेन भिन्नपदो

पात्तस्य सोमस्य करणत्वेनान्वयानुपपत्तिश्च स्यात् यदि च वैयधिकरण्येनान्वयः तत्र न तावद्यागेन सोममित्यन्वयः समानपदोपात्तत्वात्प्रत्ययवा

च्यफलभावनाकरणत्वेनान्वितस्य यागस्य सोमकर्मकभावनान्वयानुपपत्तेः यागस्य सोमार्थत्वापातश्च न चेष्टापत्तिः अदृष्टद्वयोपपत्तेः न

हि यागस्य सोमार्थत्वं दृष्टद्वारेण संभवति व्रीहिष्ववघातेनेव यागेन सोमे कस्यचिद्दृष्टस्याजननात् [illegible] न तावत्सोमे किंचिददृष्टं जननीयम् प्रोद २

व्रीहिष्ववघातेन यथा वैतुष्यं दृष्टं फलं तथा नेहेति भावः

अनुपपत्तेरिति समानपदोपात्तभावनायां करणत्वेनान्वितस्य यागस्य सोमे करणत्वेनान्वयो न संभवतीत्यर्थः तस्य पदा

रोपत्वेनाव्यवहितत्वात् सत्यव्यवहितापेक्षया व्यवहितान्वयस्यान्याय्यत्वात् अन्यत्र विशेषणत्वेनान्वितस्यान्यत्र [illegible]

रेवत्यधिकरणे च वारवंतीयात्मकमग्निष्टोमसामभाव्यकभावनाविशिष्टपशुभाव्यकैतद्यागकरणकतदुपकारकाकांक्षकलापेति कथं का भावना इति वाक्यार्थः २

र्थभावनायां समानपदश्रुत्या यागस्य भाव्यत्वाशंकायाः प्रकृतार्थत्वेन परिहृतमपि यदि धात्वर्थस्य करणत्वेनैव भावनायामन्वयस्तदा भाव्यत्वशंकैव नो
देतीति व्यर्थ एव प्रथमाधिकरणमापद्येत किंच वाजपेयाधिकरणे तत्र संबंधस्याशंका परिहृतः धात्वर्थस्य करणत्वेनैवान्वये तत्र संबंधशंकैव न स्यात् तत्र
संबंधशंकापरिहारौ च व्यर्थौ स्याताम् किंच धात्वर्थस्य न करणत्वेनैवान्वयः गुणकामाधिकरणे आश्रयत्वेन धात्वर्थान्वयस्योक्तत्वात् तथा हि दध्ने
न्द्रियकामस्य जुहुयादित्यत्र न तावद्धोमो विधीयते तस्य च वचनान्तरेण प्राप्तत्वात् नापि होमस्य फलसंबंधः गुणस्यानर्थक्यापत्तेः नापि गुणसंबं
धं विधत्ते फलपदानर्थक्यापातात् नाप्युभयसंबंधं विधत्ते प्राप्ते कर्मणि अनेकविधाने वाक्यभेदापत्तेः यथाहुः प्राप्ते कर्मणि नानेको वि
धातुं शक्यते गुणः अप्राप्ते तु विधीयंते बहवोप्येकयत्नतः इति अत्र च कर्मपदं गुणोत्पत्त्युपलक्षणम् एकोद्देशेनानेकविधाने वाक्यभेदात् अत एव ग्रहैकत्वाधि
करणे ग्रहं संमार्ष्टीत्यत्र ग्रहोद्देशेनैकत्वमात्रविधौ वाक्यभेदाद् ग्रहैकत्वमविवक्षितमित्युक्तम् रेवत्यधिकरणे च एतस्यैव रैवतीषु वारवंतीयमग्निष्टो
मसामकृत्वा पशुकामो ह्येतेन यजेतेत्यत्र वारवंतीयस्य रैवतीसंबंधे अग्निष्टोमसामसंबंधे फलसंबंधे च विधीयमाने वाक्यभेदात् भावनोपसर्जनं भावनांत
रं विधीयत इत्युक्तम् तस्मादत्र होमेनोभयविधानं संभवति नापि होमांतरं विधीयते गौरवप्रसंगात् प्रकृतहानाप्रकृतकल्पनाप्रसंगात् मत्वर्थलक्षणा
प्रसंगाच्च नापि दध्न एव केवलं करणत्वेन विधीयत इत्युक्तम् केवलस्य व्यापारानाविष्टस्य करणत्वानुपपत्तेः कर्तृव्यापारव्याप्यत्वनियमात् करण
स्य किं तर्हि विधीयत इति चेत् दध्नेति तृतीययानुपात्तं दधिकरणत्वं फलभावनायां करणत्वेन विधीयते प्रत्ययार्थत्वेन दध्नोपस्थितस्य प्राधान्यात् एवं च द
धिकरणत्वेनेंद्रियं भावयेदिति वाक्यार्थः करणत्वं च किंप्रतियोगिकमित्यपेक्षायां संनिधिप्राप्तो होम आश्रयत्वेन संबध्यते तत्र च सिद्धो धात्वर्थस्याश्रयत्वेन
न्वयः प्रकृतमनुसरामः तस्मिंश्च धात्वर्थस्य न करणत्वेनैवान्वय इति किं तर्हि क्वचित्करणत्वेन क्वचित्साध्यत्वेन क्वचिदाश्रयत्वेनेति गुणविधौ च साध्यत्वे
नान्वयः संभवतीति न मत्वर्थलक्षणायाः प्रयोजनम् किंच गुणविधौ मत्वर्थलक्षणायां गुणस्य धात्वर्थाश्रयत्वे किं मानमिति वक्तव्यम् न तावच्छ्रुतिः मत्वर्थ

म.

कारणादग्रहणम् यथाहुः नावांतरक्रियायोगादृतेवाक्योपकल्पितात् गुणाद्द्रव्येकथंभावेरर्हत्ीतिप्रकृताक्रियादृति तदेतदग्रेवक्ष्यामः किंचसोमेनयजेतेति
यागस्योत्प त्तिवाक्यंनत्वधिकारवाक्यम् ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यस्याधिकारवाक्यत्वात् उत्पत्तिवाक्येचनेतिकर्त्तव्यताकांक्षा इत्थविशेषाकांक्षा
कल्पितत्वेनेतिकर्त्तव्यताकांक्षायाविलम्बमनुत्थानात् नाप्तिद्धंसोमस्यनेतिकर्त्तव्यतात्वेनभावनायामन्वयः तस्माद्विशिष्ट विधावन्वयानुपपत्त्यांशा ८३
मत्वर्थलक्षणाभ्वाच्येति नन्वेवमपिसोमेनयजेतेत्यत्रनविशिष्टविधानम् गौरवात् मत्वर्थलक्षणापाताच्च किंतु दध्नाजुहोतीतिवत् गुणमात्रविधानमस्तु विधि
शक्तेर्गुणंतक्रमात् यथाहुः सर्वत्रास्व्यातसंबद्धे श्रूयमाणोपदान्तरे विधिशक्त्युपसंक्रांतेः स्याद्धातोरनुवादतेति नचयागस्याप्राप्तत्वात्त दुद्देशेनसोमविधानमितिवा
च्यम् ज्योतिष्टोमेनस्वर्गकामोयजेतेत्यनेनयागस्यप्राप्तत्वात् नचास्याधिकारविधित्वेननोत्पत्तिविधित्वमितिवाच्यम् उद्भिदायजेतपशुकामइतिवदे
कस्यैवोभयविधित्वोपपत्तेः एवंचसोमेनयजेतेत्यत्रनमत्वर्थलक्षणा यदित्वत्रविशिष्टविधानंस्यात्तदान्वयानुपपत्त्यामत्वर्थलक्षणास्यात् ज्योतिष्टोमेन
यागेनस्वर्गकामोयजेतेत्यत्रतुयागविधानेक्वचिन्नमत्वर्थलक्षणा नतावदेतस्मिन्वाक्येज्योतिष्टोमेनयागेनस्वर्गंभावयेदितिसामानाधिक
रण्येनैवानुपपदस्यान्वयात् नापिसोमेनयजेतेत्यत्रयागोद्देशेनसोमविधानात् सोमेनयागंभावयेदिति नत्वत्रैवानुवादेप्यस्तिमत्वर्थलक्षणात्र
तएवोक्तंविधानेवानुवादेवायागःकरणमिष्यतेतत्समीपेतृतीयान्तंतद्वाचित्वंनमेचतीति अतश्चविशिष्टविधाविवगुणविधावप्यस्त्येवमत्वर्थ।
लक्षणेतिचेत् मैवम् गुणान्वयानुपपत्त्याहिमत्वर्थलक्षणांगीक्रियते पदातभावनायांधात्वर्थस्यकरणत्वेनान्वयः तदान्वयानुपप त्त्या हिसांगीकर्त्त
व्या गुणविधौचनधात्वर्थस्यकरणत्वेनान्वयोमानाभावात् नहिदध्नाजुहोतीत्यत्रहोमस्यकरणत्वंश्रूयते तद्वाचकतृतीयाद्यभावात् कल्प
तइतिचेत् न गुणस्यतत्रविधित्सितत्वेनसाध्याकांक्षायांसाध्यत्वकल्पनायाएवोचितत्वात् दध्नाहोमंभावयेदिति नचायमस्तिनियमोभावनायां
धात्वर्थस्यकरणत्वेनान्वयोनप्रकारांतरेणेतिषष्ठ्यापूर्वयक्षातत्यानायत्तेः षष्ठ्यान्वेहिदयजेतस्वर्ग कामइत्यादौप्रत्ययवाच्यायांचकमाणा

[illegible]

आघाराग्निहोत्राधिकरण इति अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रेण होमेनेष्टं भावयेदिति वाक्यार्थस्वीकारे पूर्वपक्षे ऽग्निहोत्रेति बहुव्रीहिणा आहवनीयाद्यग्निसंबंधिनो ऽग्नेरुपदेवतासंबंधिनो वा हो
मस्यावगतो न तु फलसंबंधबोधकविधानस्य प्रमाणमधिकरणत्वाग्निदेवताकत्वयोः प्राप्तिः फलतो गुणविधित्वस्यार्थः न तु प्रतीतिरित्यस्य तु अग्निर्ज्योतिर्ज्योतिरग्निरिति चाह इति सायं च होतीत्यस्याप
र्यालोचनदशायामग्निहोत्रं जुहोतीति वाक्यमालोचयतस्तद्वाक्यस्यैव गुणविधायकत्वमिति प्रतीतिर्भवतीति चेन्नेत्यर्थः २

देशेन गुणमात्रविधानान्न मत्वर्थलक्षणेति [illegible] वो [illegible]यार्थमाप्यमिश्रेणाघाराग्निहोत्राधिकरणे फलतो गुणविधिरयं न प्रतीति
तस्तथात्वे तद्वार्तिकं अधिकारविध्यभिप्रायेण तैर्दीयजेतेत्यादीनामधिकारात् तत्र हि यागो विधीयतामुत्पत्तिर्वा क्वचित्सिद्धो वानूद्यतां तत्र भयथापि
करणत्वेनान्वयात् तृतीयां तत्र तद्वाचि अन्यथा अन्वयानुपपत्तेरिति तस्माद्गुणविधौ विनापि लक्षणां यागान्वयोपपत्तेर्न मत्वर्थलक्षणेति अत एव होमेन यजे
तेत्यत्र न विशिष्टविधानं किंतु गुणमात्रविधानं यागस्तु ज्योतिष्टोमेन स्वर्गकामो यजेतेत्येतस्मिन्वाक्ये विधीयत इत्येवयुक्तम् अन्यथा मत्वर्थलक्षणाय
जेरिति अत्रोच्यते यद्यपि यागोद्देशेन सोमविधौ न मत्वर्थलक्षणा तथापि यागस्याप्राप्तत्वात् सोमेन यजेतेत्यत्र यागोद्देशेन सोमविधानं न संभवति न च ज्योतिष्टोमे
देनेत्यादिना प्राप्तत्वात् तदुद्देशेन गुणमात्रं विधीयत इति वाच्यम् तस्याधिकारविधित्वेनोत्पत्तिविधित्वानुपपत्तेः कर्मस्वरूपमात्रबोधको हि विधिरुत्पत्तिवि
धिस्तेन च विहितस्य कर्मणः फलविशेषसंबंधमात्रमधिकारविधिना क्रियते फलविशेषबोधकस्याधिकारविधित्वात् यथाऽऽग्नेयोऽष्टाकपालो भव
तीत्येतद्विहितस्य कर्मणः फलविशेषसंबंधमात्रं दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति वाक्यं विधत्ते इति तस्याधिकारविधित्वं नोत्पत्तिविधित्वं स्यादेतत् तद
र्शपूर्णमासाभ्यामित्येतस्य नोत्पत्तिविधित्वं संभवति आग्नेयोऽष्टाकपाल इत्यादिवाक्यानर्थक्यापत्तेः न हि तेनैव कर्म विधीयते न तस्य दर्शपूर्णमासाभ्या
मित्यनेन विहितत्वात् नापि गुणविधानं संभवति प्राप्ते कर्मणि अनेकगुणविधाने वाक्यभेदापत्तेः अतः आग्नेयोऽष्टाकपाल इत्यस्योत्पत्तिविधित्वं दर्श
पूर्णमासाभ्यामित्यस्य चाधिकारविधित्वं युक्तम् ज्योतिष्टोमेनेत्यस्य तु अधिकारविधित्वे उद्भिदा यजेत पशुकाम इत्यादिवत् उत्पत्तिविधित्वे च स्तोत्रो।
यमाणेन कस्यचिदानर्थक्यम् सोमेन यजेतेत्यस्य गुणविधित्वात् यागोद्देशेन सोममात्रविधानाच्च न वाक्यभेद इति चेत् मैवं यद्यपि सोमेन यजेतेत्य
त्र न वाक्यभेदः तथापि ज्योति[illegible]ष्टोमेनेत्येतस्मिन्वाक्ये कर्मस्वरूपे तस्य च फलसंबंधे विधीयमाने गौरवलक्षणो वाक्यभेदः स्यादेव सोमेन य
जेतेत्येतद्वाक्यविहितकर्मणः फलसंबंधमात्रविधाने तदभावात् उद्भिदा यजेतेत्यत्र तु वचनान्तराभावेनागत्या तदाश्रयणं न च सोमेन यजेतेत्यत्रापि १

उद्भिदा यजेतेत्यस्य पूर्वपक्षे यागवाद उद्भिद्रूपो गुणो विधीयते पशुकाम इति तस्य वो ज्योतिष्टोमः इति प्राप्तस्य फलस्यैकदेशत्ववारणत्यतिशिष्ट सोमेनावाहत्वात् उद्भिद्रूपगुणवि राम
धिनाहमभवेपि उद्भिद्रूपगुणविशिष्टयागफलविशेषाय विधीयते इत्यत्र धात्वर्थस्य विधेयत्वेन वा पदत्वे च धात्वर्थस्यैकरणत्वेनान्वयः उद्भित्पदे मत्वर्थलक्षणायेति भावः २७

4

यदिहोमो

यदिदधिहोमांगंनस्यात्तदामनूपादधितामयोमहोद्वारांग्रवृथीस्यात्ततोदधिहोमांगमित्याकारकोलिंगम्लमभिव्याहारात्मकवाक्यान्वयानुपपत्त्याकल्पतेतदनंतरं दध्नाहोमंभावयेदितिश्रुतिः कल्पते

मत्वर्थलक्षणायांतुनीयाश्रुतिर्मत्वर्थस्यैवांगत्वेमानंस्यात्नगुणस्यांगत्वे· समभिव्याहारात्मकंवाक्यमितिचेत्· तत्किंस्वतंत्रमेवमानंउतलिंगश्रुतीकल्पयित्वा नाद्योवला

वलाधिकरणविरोधात्· तर्हिवाक्यलिंगश्रुतीकल्पयित्वांगत्वेमानमित्युक्तम्· द्वितीयेप्रत्यक्षांश्रुतिमनुसृत्यतरकल्पनेतस्यैववान्यावृत्तिकल्पनेवृथा

प्रयासःसमाश्रितःस्यात्विशिष्टविधौचागत्यातदाश्रयणम् किंचभवत्पक्षेत्पत्तकल्पनम्· तच्चापितत्तत्ततःप्रत्यक्षएवविधिर्धात्वर्थांगत्वेनगुणंवि

धत्तेउतकल्पितविध्यंतरंकल्पितमितिचेत् नक्रतविधेर्व्यर्थतापत्तेः नहितेनतदागुणोविधीयते· कल्पितविध्यंतरांगीकारात्तत्रापिधात्वर्थःतस्यैव।

चनांतरेणविहितत्वात्· अथक्रयमाणएवविधिः कल्पितश्रुतिसहकृतोधात्वर्थांगत्वेनगुणं विधत्तइतिचेत्· तर्हितत्रकथंधात्वर्थस्यान्वयः करणत्वे

नेतिचेत्· न· अन्वयानुपपत्तेः नहिहोमंभवतिदध्नाहोमेनेतिवान्वयः साध्यत्वेनैवान्वयोदध्नाहोमं भावयेदितिचेन्न तथाश्रुतिश्रुतवाक्येऽपिधात्वर्थःक

रणत्वेनैवान्वेतीत्येतदुपेक्षितंस्यात्विवक्षितवाक्यार्थश्चविनेवमत्वर्थलक्षणामंगीकृतःस्यात्तस्मात्गुणविधौमत्वर्थलक्षणायत्तविधानेवानुवादेवेति।

वार्तिककृत्प्रतीतिमवलंब्यनवलगतिंतथाहियावदग्निहोत्रंजुहुयादितिवाक्यंनालोच्यतेकेवलंचदध्नाजुहोतीतिवाक्यमालोच्यतेतदावश्याद

न्यायेनहोमस्याभाव्यत्वंज्ञानंतंप्रतिपदाधिकरणमावार्थाधिकरणवामनावाक्षिप्तानोभवत्येतादृशीमतिःयद्धिमताहोमेनेष्टंभावयेदितिप्रतिपदा

धिकरणेहिहोमेनयजेतेत्यादिषुकिंगुणधात्वर्थयोःफलभावनायांकरणत्वेनान्वयः उतएकस्यैवेतिसंदिह्यप्रधानसंवंधत्वाभाद्विनिगमनाविरह

द्वाभ्यामेवंषाफलभावनाकरणत्वेनान्वयमाशंक्यलाद्यवादेकस्यैवफलभावनाकरणत्वमित्युक्तम्· भावनाकरणत्वंहिभावनाभाव्यनिर्वर्त्तकत्वया

भाव्यंचस्वर्गादिनाःदृष्टमंतरेणेति अनेकेषांकरणत्वेंऽतधात्वर्थस्येतिभावार्थाधिकरणेसंदिह्यद्रव्यगुणयोरेवभावनाकरणत्वंभूतभव्यायोपदि

श्यतइतिन्यायादित्यांगुणविधावपिधात्वर्थस्यकरणत्वाशंकायांगुणपदेमत्वाशंकायांगुणपदेमत्वर्थस्यकरणत्वाशंकायांगुणपदेम

त्वर्थलक्षणेतिपदा· अग्निहोत्रंजुहोतीतिहोमविधायकंवाक्यांतरमालोच्यते तदाहोमस्यवाक्यांतरेणैवविहितत्वाद्गुड

शंक्यधात्वर्थस्यैवभावनाकरणत्वपदश्रुतेर्वलीयस्त्वादित्युक्तम्· अतः सिद्धमेतद्वाक्यांतरानालोचनदशायां२

तेनेतिश्रुतविधिनेत्यर्थः १२

श्रुतविधियतइतिशेषः २२

अ०प्र० अग्निहोत्रं जुहोतीत्यत्र यद्यपि १

रूपं नोपलभ्यते अग्निहोत्रशब्दस्य तत्प्रख्यन्यायेन नामधेयत्वात् न देवतादिकमेव द्रव्यम्ः तथापि तस्योत्पत्तिविधित्वं स्वीक्रियते अन्यथानर्थक्यापत्तेः दध्ना जु

४ होतीत्यत्र वचनानर्थक्यं गुणविधित्वात् अत अग्निहोत्रं जुहोतीत्ययं कर्मोत्पत्तिविधिरिति प्रोक्तम् ज्योतिष्टोमेनेत्यस्य वचनानर्थक्यं अधिकारविधित्वोप

पत्तेः अतः किमर्थं भवति भवति यः कोऽकर्मविधानं तद्रहितेन तत्स्वीकार्यम् किंच दध्ना जुहोतीत्यस्य कर्मोत्पत्तिविधित्वे पयसा जुहोतीत्यनेन

नैतत्कर्मान्तरवादेन पयआदि विधातुं शक्यते उत्पत्तिशिष्टदध्यवरोधात् उत्पत्तिशिष्टगुणावरुद्धे हि न गुणान्तरं विधीयते आकाङ्क्षाया उत्पत्तिशिष्टेने

5 व निवृत्तत्वात् अतस्तेनापि विशिष्टकर्मान्तरं विधेयम् तथा चानेकादृष्टकल्पनागौरवम् अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वे एत

द्वाक्यविहितस्य कर्मणः द्रव्याकाङ्क्षायां प्राप्तदेवतात्वेन कल्पितत्वाद्येन दध्ना जुहोति पयसा जुहोतीत्यादिवाक्येन गुणो विधीयते इति ना

अतः नेकादृष्टकल्पनागौरवम् अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधिः पयसा जुहोतीत्यादयो गुणविधय इति प्रोक्तम् सोमेन यजेतेत्यत्रापि भवति वाक्ये क

र्मोत्पत्तिविधाने स्वीक्रियमाणे न किंचिद्दूषणं पश्यामः द्वयोरेकस्यादृष्टतुल्यत्वात् तस्मादुक्तं सोमेन यजेतेत्ययमेवोत्पत्तिविधिरिति अलमनया

वाविधितिहप्रणागतप्रसंगचिंतया प्रकृतमनुसरामः ततः सिद्धं विधिः प्रयोजनवत्त्वमप्राप्तार्थविधायक इति स च विधिश्चतुर्विधः उत्पत्तिविधिर्विनियोगवि

धिरधिकारविधिः प्रयोगविधिश्चेति तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः यथाऽग्निहोत्रं जुहोतीति उत्पत्तिविधौ च कर्मणः करणत्वे

नैवान्वयः होमेनेष्टं भावयेदिति० न तु होमं कुर्यादिति साध्यत्वेन तथा सति साध्यस्य साध्यान्तरान्वयायोगेनाधिकारवाक्यानां फलसंबंधो न स्यात्०

करणत्वेन त्वन्वये होमेनेष्टं भावयेत् किं तदिष्टमित्याकाङ्क्षायां फलविशेषसंबंधो घटते न चोत्पत्तिविधौ इष्टवाचकपदाभावेन कर्मणा इष्टं भावयेदि

ति कथं वाक्यार्थ इति वाच्यम् विधिश्रुतेरिष्टबोधकत्वात्० सा हि पुरुषार्थं पुनः संपूर्णयन्ती कर्मणः फलसंबंधं प्रतिबोधयति· तस्मादुक्तमुत्पत्तिविधौ

कर्म करणत्वेनान्वेतीति· अत एवोद्भिदा यजेतेत्यादौ तृतीयान्तोद्भिच्छब्दः नोपपद्यते उद्भिदा यागेनेष्टं भावयेदित्यन्वयोपपत्तेः तेषामपि इष्टसा

धनत्वलिङ्गार्थः तेषामपि तृतीयान्तानां कर्मनामधेयानां अन्यथा यथान्यत्र एवं हि संभवति यागो द्रव्यसाधनं उद्भिदेति [illegible] तृतीयो प[illegible] तत्य राम

कर्मत्वरूपेण गुणेन च विधीयमाने वाक्यभेदः स्यादिति वाच्यम् श्रूयमाणेन विधिना गुणस्याविधेयत्वात् विशेषणविधेरार्थिकत्वात् सर्वत्र हि विशि
ष्टविधौ विशेषणविधिरार्थिकः ज्योतिष्टोमेनेत्यस्य तु उत्पत्तिविधित्वे कर्मत्वरूपफलसंबंधश्चेति श्रूयमाणेनैव विधिना विधातव्यमिति दृढो वाक्यभेदः
यथाहुः प्रोतव्यापारनानात्वे ऽऽ प्रधानमतिगौरवम् एको ह्यवहितानां तु नार्थो दोषो विरुध्यत इति न च सोमेन यजेतेत्यस्योत्पत्तिविधित्वे पदद्वयेन वा
क्यभेदः तथापि मत्वर्थलक्षणस्या दोषेवेति वाच्यं तस्याः स्वीक्रियमाणत्वात् लक्षणातो वाक्यभेदस्य जघन्यत्वात् लक्षणा हि पददोषो वाक्यभे
दो वाक्ययोर्मध्ये पदद्वयदोषकल्पनायाउचितत्वात् गुणोत्वन्याय्यकल्पनेति न्यायात् अत एव जातपुत्रः कृष्णकेशोऽग्नीनाऽऽदधीतेत्यत्राधानानुवादेन जातपुत्र
त्वकृष्णकेशत्वविधाने वाक्यभेदात्पदद्वयाभ्यां अवस्थाविशेषो लक्ष्यत इत्युक्तम् तस्माद्वाक्यभेदप्रसक्तौ लक्षणैव स्वीकार्या तस्मात्सोमेन यजेतेत्य
यमेवोत्पत्तिविधिर्न ज्योतिष्टोमेनेत्ययम् गौरवलक्षणवाक्यभेदापत्तेः किं च सोमेन यजेतेत्यात्र यागविधाने श्रुत्यर्थविधानं स्यात् गुणविधाने
वाक्यार्थविधानं तच्च श्रुत्यर्थविधाने संभवति अयुक्तम् यथाहुः वाक्यार्थविधिर्न्याय्यः श्रुत्यर्थविधिसंभव इति वाक्यार्थः पदांतरार्थः ज्योतिष्टोमेने
त्यत्रापि फलोद्देशेन याग = यागकरण त्वस्य वा विधानादि सो र्थः
स्यैव विधानान्न वाक्यार्थविधानम् तदुत्पत्तिविधित्ववादिनापि तदंगीकाराच्च तस्माज्ज्योतिष्टोमेनेत्ययमधिकारविधिरे
व अपि च कर्मस्वरूपविधिस्तत्र स्वीकार्यो यत्र कर्मणो रूपमुपलभ्यते यागस्य च द्रव्यदेवतारूपे द्रव्यं देवता च सोमेन यजेतेत्यत्र पदापि देवता नोपलभ्यते सोमयागस्य
अव्यक्तत्वात् अव्यक्तत्वं च चत्वार्थ्यचोदितदेवतारहितत्वं यत्तु देवतारहितत्वेन तु देवतारहित्यमात्रं ऐंद्रवायवं गृह्णातीत्यादिवाक्यविहितग्रहणदेवतानां
भि॰ सत्वात् ग्रहणार्थोर्पि देवताभिः प्रसंगतः यागोपकारस्य क्रियमाणत्वात् तथापि द्रव्यमुपलभ्यत एवं तेन यागस्वरूपं ज्ञातुं शक्यमेव ज्योतिष्टोमेन स्वर्गका
मो यजेतेत्यत्र च न द्रव्यदेवता वा श्रूयते अतस्तस्योत्पत्तिविधित्वे यागविशेषज्ञानेन यागसामान्यस्याविधेयत्वात् विशेषस्य चाविधेयत्वात् इत्यादिक्लेशेन स्या
त् अतोव्यापकमोत्पत्तिविधिः नन्वेवमपि अग्निहोत्रं जुहोतीत्ययमपि होमोत्पत्तिविधिर्न स्यात् रूपाश्रवणात् न दध्ना जुहोतीत्ययमेवोत्पत्तिविधि
स्यात् तथा चाग्निहोत्रं जुहोतीति कर्मनामधेयं हि अग्निहोत्रं जुहोतीत्यस्योत्पत्तिविधित्वं दध्ना जुहोतीत्यादीनां च गुणविधित्वमुक्तमिति चेत् तत्र

इष्टसाधनत्वनामसृष्टत्वेतिमंत्रः इत्यस्याभिधानीमादत्त इति श्रुत्यास्यांकृतस्ययागस्य इत्यर्थः २

तस्याससंख्यया १ स्वाश्रयकर्त्तृकत्वसंबंधेन १

हरूतयाद्वितीयाश्रुत्यातएडुलनिर्वृत्तिपूर्णाल्दा परपूर्वसाधनंतंदांगत्वंप्रोक्तएषोच्यतेइति एवंसर्वत्रप्रयोगेषुपूर्वप्रयुक्तत्वेवेदितव्यम् एवमि
मारा. मौञ्जश्नामस्तस्येत्यश्वाभिधानीमादत्तइत्यत्रापिद्वितीयाश्रुत्यामंत्रस्याश्वाभिधान्यांगत्वेयत्नवाक्योयंविनियोगइतितन्नतथाहतिवा २
क्यालिंगस्यदुर्बलीयस्त्वेनयावद्वाक्यादश्वाभिधान्यंगत्वंसंभवतितावल्लिंगाद्रशनामात्रांगमेवस्यात् सोनतेसदनंकृणोमीत्यस्येवसदनांगत्वम् श्रोत
विनियोगएवहेतयावत्लिंगाद्रशनामात्रांगत्वंसंभवतितावत्श्रुत्याऐंद्र्यागार्हपत्यमुपतिष्ठतइत्यत्रतृतीयाश्रुत्याऐंद्र्याऋचेगार्हपत्यापस्थानां
गत्ववत् अश्वाभिधान्यांविनियोगःकिंयतेइतियुक्तमंत्रस्याश्वाभिधान्यांगत्वं तस्माछ्रौतएवायंविनियोगः यदाहवनीयेजुहोतीतिश्राह
वनीयस्यहोमांगत्वंसप्तमीश्रुत्याएवमन्योपिविभक्तिश्रुत्याविनियोगोज्ञेयः पशुनायजेतेत्यत्रएकत्वंपुंस्त्वयोःसमानाभिधानश्रुत्याकारकांगत्वं
यजेतेतिश्राख्याताभिहितसंख्योपाभावेनांगत्वम् समानाभिधानश्रुतेरेकपदश्रुत्याचयांगागोत्वम् नचाश्रुताथातस्याकथंयागांगत्वमितिवा।
च्यात्कर्तृपरिछेदद्वारातदुपपत्तेःकर्त्ताचाक्षेपलभ्यःश्राख्यातेनहिभावनोच्यतेसाचकर्त्तारंविनाऽनुपपन्नातमाक्षिपतिनन्वकिमित्येवंव
र्णिते श्राक्षेपलभ्यःकर्त्तेति श्राख्यातवाच्यएवकिंनस्यात् श्राख्यातश्रवणेभावनायाइवकर्त्तुरपिप्रतीयतेः नचभावनयैवाक्षेपसं
भवेकिमितितद्वाचकत्वंकल्पनीयामितिसांप्रतंतथासतिश्राख्यातवाच्यकत्वेवभावनाक्षेपसंभवेतद्वाचकत्वमपिनस्यात् किंचभावना
याःनकेवलंकर्त्रैवसंबंधःकारकांतरेणापिसंबंधात्अतःसानकर्त्रेतिकर्त्तारमेवाक्षिपेत्विशेषाभावात् कर्त्तातुभावनयैवसंबद्धोनकार
कांतरेणगुणानांचपरार्थत्वात् असंबंधःसमत्वात्स्यादितिन्यायात् अतःकर्त्रेतितमाक्षिपेदितिसएवाख्यातवाच्योभावनातुश्राक्षेपलभ्या
वाकिंनस्यात् किंचैवंतृतीयादिविभक्तीनामपिकरणत्वादिवाचकत्वंनस्यात् तेषामपिकारकवत्श्राक्षेपलाभसंभवात् किंचयदि
कर्त्तानवाच्यःस्यात्कथमेकत्वेनान्वीयात्नशाब्दस्याशाब्देनान्वेतीतिष्ठक्रमम् अन्यथाकहादिलोपप्रसंगः किंचदेवदत्तःपचतीति
सामानाधिकरण्यंनस्यात्नहिकेवलंभावनावाचकस्याख्यातस्यदेवदत्तपदेनसामानाधिकरण्यमुपपद्यतेएकार्थनिष्ठत्वाभावात्

ख्या   गुणानामितिगुणानामंगानांपरार्थत्वात्प्रधानार्थत्वात्समत्वादसंबंधं

एकत्वपुंस्त्वयोः   भावनांगत्वमितितथाचयागकरणिकाएकाभावनाइत्यर्थः परस्परमित्यर्थः अत्रचांगानांकारकाणां
भावनासंबंधिनंकर्त्तारमेवाक्षिपतिनकारकांतराणीत्यत्रविशेषस्याभावाच्च ५   कर्त्रादीनांमुख्ययाभावनयैवसंबंधोनतुपरस्परमितिभावः ५

राम
६

कारकस्यलिंगसंख्यान्वयोपोप्यपस्यात्क्रियायैवान्वयात् ननु तथापि अग्निहोत्रंजुहोतीत्यादिषु कर्मोत्पत्तिविधिषु द्वितीयान्तानां कर्मनामधेयानां अन्वयो
नुपपन्नएव नहिहोमंभवति होमेनभावयेदग्निहोत्रमिति सत्यम् अक्रयमाणतावद्द्वितीयार्थास्तितत्साध्यत्वानुवादः होमस्यहिकरणत्वेनान्व
द्वितीयाप्र त्या २ यात् असाधितस्यकरणत्वानुपपत्तेः तस्याश्चानन्वयोपि स्थितो सास्तकुन जुहोतीतिवत् तृतीयार्थलक्षणया अग्निहोत्रेण होमेनेष्टंभा
वयेदित्युक्तं पार्थसारथिमिश्रैः अतश्च द्वितीयान्तानां कर्मनामधेयानामन्वयोनानुपपन्नः तस्मिन्नुत्पत्तिविधौ करणत्वेनान्वयात् अंगप्रधानसंबंधबो
धको विधिर्विनियोगविधिः यथा दध्नाजुहोतीति स हि तृतीयाप्रतिपन्नांगभावस्यदध्नः होमसंबंधं विधत्ते दध्ना होमंभावयेदिति एतस्यविधेः सहकारीभूता
निषट्प्रमाणानि श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यारूपाणि एतत्सहकृतेन विधिना अंगत्वं परोद्देशप्रवृत्तकृतिव्याप्यत्वरूपं पारार्थ्यापरपर्यायं पयेयागादि
ज्ञाप्यते तत्र निरपेक्षोरवः श्रुतिः सा च त्रिविधा विधात्री अभिधात्री विनियोक्त्री चेति तत्र विधात्री लिङाद्यात्मिका अभिधात्री व्रीह्यादिश्रुतिः यस्य च
शब्दस्यश्रवणादेव संबंधः प्रतीयते सा विनियोक्त्री सा च त्रिविधा विभक्तिरूपा एकाभिधानरूपा एकपदरूपा चेति तत्र विभक्तिश्रुत्यांगत्वं यथा व्री
हिभिर्यजेतेति तृतीयाश्रुत्या व्रीहीणां यागांगत्वं न चोत्पत्तिशिष्टपुरोडाशावरुद्धे यागे कथं व्रीहीणामंगत्वमिति वाच्यम् पुरोडाशप्रकृतित्वयो
पपत्तेः पशोरिवहृदयादिरूपहविः अवदीयमानंहि हविः यथा पुरोडाशादिः मध्यात्पूर्वार्द्धाच्चावद्यतीतिवाक्यात् हृदयादीनि चावदीयमान
नय नानि हृदयस्याग्रेऽवद्यतीतिवाक्यात् अतो हृदयादीन्येव हवींषि पशुस्तु प्रकृतिद्रव्यम् पात्नीवतयागेतु मा स्तात्पशुरेवागम् तस्यजी
वत एव पर्यग्निकृतं पात्नीवतमुत्सृजतीति उत्सर्गविधानात् यत्र तु विशसनं तत्र पशुः प्रकृतिद्रव्यमिति सिद्धम् एवं व्रीह्यादयोपि प्रकृतिद्रव्यतया यागां
गत्वं तृतीयाश्रुत्येति आह एवमपि क्रयांगत्वं तृतीयाश्रुत्यानवाप्तम् तस्य कथं क्रयांगत्वमिति वाच्यम् एकहायिनीरूपद्रव्यपरिच्छेदद्वारा तदुपपत्तेः व्री
हीन्प्रोक्षतीति प्रोक्षणस्य व्रीह्यंगत्वं द्वितीयाश्रुत्या तत्र प्रोक्षणेन व्रीहिस्वरूपार्थम् स्वरूपे आनर्थक्यात् व्रीहिस्वरूपस्य प्रोक्षणं विनाप्युप
पपत्त्यभावात् किंत्वपूर्वसाधनत्वप्रयुक्तम् यदि व्रीहिः प्रोक्षणेन क्रीयते तदा तैर्यागेऽनुष्ठिते पूर्वं भवति नान्यथेति अतः प्रकरणस

अरुणयैकहायिन्या पिंगाक्ष्या सोमं क्रीणातीत्यत्रेत्यर्थः २

सा पूर्वसंबंधि किं चित्प्रकाश्यत इति ग्रन्थस्य प्रकरणपाठवैयर्थ्यप्रसंगात् देवन्दधू
संबंधिप्रकाश्यपेक्षायां सा १२

द्वेन चद्रव्यमाज्याभिधानात् स्रुतश्च भिन्नार्थनिष्ठत्वात्तन्मते भिन्नमुख्यभासामानाधिकरण्यं किं तु लाक्षणिकमेवेति न कश्चिद्विशेषः न च लः कर्तरीति व्याकरणस्मृतिबलादाख्यातवाच्यः
कर्तेति वाच्यं तर्हि वाच्यवाचकभावो व्याकरणस्मृत्यधीनः तस्मिन्न्यायसहितान्वयव्यतिरेकागम्यत्वात् वा स्मृतिगम्यः तथापि नैयायिकस्मृतिः कर्ताख्यातवाच्यत्वे प्रमाणं किं तु कर्तुरेकत्वे एकव
चनात्मको लकारः द्वित्वे द्विवचनात्मकः बहुत्वे बहुवचनात्मक इत्यस्मिन्नर्थे प्रमाणं द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनम् इत्यनेनास्याः स्मृतेरेकवाक्यत्वात् यत्तु कर्तुरन
भिधाने देवदत्तेन पच्यतीति तृतीयाप्रसंग इति तन्न तृतीया हि कर्तृप्रतीत्यर्थं तत्संख्याप्रतिपत्त्यर्थं वा तत्र कर्तानुभावनाद्वयादेव लभ्यते इति न तत्र तृतीयापेक्षा त
त्संख्या त्वाख्यातेनैव प्रतीयते इति न तत्राप्यपेक्षा यथाहुः संख्यायाः कारके चाधीर्विभक्त्या हि प्रवर्त्यते उभयं चात्र तत्सिद्धं भावनातिङ्विभक्तितः इति यत्र तु ना
ख्यातेन तत्कृता संख्योच्यते तत्र भवत्येव तृतीया यथा देवदत्तेन ओदनः पच्यते इति तस्मान्न कर्तुरनभिधाने किंचिद्दूषणमित्यलमतिविस्तरेण प्रकृतमनुसरामः
तत्सिद्धं त्रिविधः श्रुतिविनियोगः सेयं श्रुतिर्लिंगादिभ्यः प्रबलं प्रमाणं लिंगादिषु हि न प्रत्यक्षो विनियोजकः शब्दोऽस्ति किं तु कल्प्यः यावच्छ्रुतेर्विनियोजकः शब्दः
कः कल्प्यते तावच्छ्रुत्या सेयं श्रुत्या विनियोगस्य कृतत्वात्तेषां कल्पकत्वशक्तिर्विहन्यत इति श्रुतेः प्राबल्यमत एवैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र यावदैन्द्रीलिंगादिंद्रोपस्थानार्थ
त्वं कल्प्यते तावच्छ्रुत्या गार्हपत्योपस्थानार्थत्वं क्रियत इति ऐन्द्र्या गार्हपत्योपस्थानांगत्वं सामर्थ्यं लिंगं यथाहुः सामर्थ्यं सर्वभावानां लिंगमित्यभिधीयत इति तेनांग
त्वं यथा बर्हिर्देवसदनं दामीत्यस्य लवनांगत्वं स हि लवनं प्रकाशयितुं समर्थः तच्च लिंगं द्विविधम् सामान्यसंबंधबोधकप्रमाणांतरानपेक्षं तदपेक्षं च तत्र प्रथमं तेनाय
भवत्येव तस्य तदंगत्वं तदनपेक्षं केवलं लिंगादेव यथार्थज्ञानस्य कर्मानुष्ठानांगत्वं न हि अर्थज्ञानमंतरेणानुष्ठानं संभवति यदंतरेण यन्न संभवति तस्य तदर्थत्वं तदपेक्षं यथोक्तस्य
मंत्रस्य लवनांगत्वं लवनं हि तयांतरेण स्वत्वाकर्तुं शक्यं अतो न मंत्रो लवनस्वरूपार्थः संभवति किं तु अपूर्वसाधनीभूतलवनप्रकाशनार्थः तच्च वचनसामर्थ्यमात्रादवग
म्यते लवनप्रकाशनमात्रे सामर्थ्यात् अतोऽवश्यं प्रकरणादि सामान्यसंबंधबोधकं स्वीकार्यं दर्शपूर्णमासप्रकरणे हि मंत्रस्य पाठादेवमवगम्यते अनेन मंत्रेण दर्शपूर्णमासीयो
बर्हिर्लवनमवगम्यते तेन हि बर्हिः संस्कारद्वारा पूर्वसंबंधीति मंत्रस्य सामर्थ्यात्तदर्थत्वे सति नानर्थक्यं प्रसज्यते तस्मात् बर्हिर्देवसदनं दामीत्यस्य प्रकरणात् दर्शपूर्णमास
संबंधितयावगतस्य सामर्थ्यात् लवनांगत्वमिति सिद्धम् एषां नु मंत्राणां मंत्राणां तु यागानुमंत्रणसमाख्यायया सामान्यसंबंधेऽवगते सामर्थ्यात् पृथक् यागसंबंधोऽवगम्यते न तु तेषां या
अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम् इंद्राग्न्योरहं देवयज्ययेंद्रियाव्यन्नादो भूयासम् इंद्रस्याहं देवयज्ययेंद्रियावी भूयासम् महेंद्रस्याहं देवयज्यया जेमानं महिमानं गमेयम् अग्नेः स्विष्टकृतो
हं देवयज्ययायुष्मान् यज्ञेन प्रतिष्ठां गमेयम् पुरोहं देवयज्यया प्रतिष्ठामानयशुमान् भूयासम् विश्वेषां देवानामहं देवयज्यया प्राणैः सायुज्यं गमेयं गमेयं द्यावापृथिव्योरहं देवयज्ययोभयो ७
र्लोकयोर्ऋध्यासमित्येतेषां यागानुमंत्रणमंत्राः १

समभिव्याहारादेवदाकार्थलाभादित्यर्थः ॥ नचाख्यातेनैवकर्तृलाभात्कृतंप्रथमयेत्यतआह प्रातिपदिकेति ३

कर्तृवाचकत्वेनूपपद्यतएवलः कर्तरीतिव्याकरणस्मृतिविरोधस्तुकर्तुरनभिधेयत्वेस्यष्ट॥ किंचकर्तुरनभिधेयत्वेदेवदत्तेनपचतीतिप्रयोगप्रसंगः

तृतीयाहिअनभिहितयोः कर्तृकरणयोर्विहिताआख्यातेनचकर्तानैहितइतिकृत्यचितृतीयास्यादेव कर्तुरभिधानेतुअभिहितत्वादेवतृतीया

नप्राप्नोतितस्याअनभिहिताधिकारत्वात्देवदत्तःपचतीतिप्रथमानप्राप्नोत्येवप्रथमायाअभिहितकारकविभक्तित्वात् प्रातिपदिकार्थमात्रवाचित्वा

द्यानचतदाप्रातिपदिकेनैवार्थस्योक्तत्वात्प्रथमावेयर्थ्यं लिंगसंख्याप्रतिपत्यर्थत्तस्याआवश्यकत्वात् केवलप्रातिपदिकस्यप्रयोगाभावात्ततश्च

पदिकर्तानवाच्यःस्याद्देवदत्तेनपचतीतिप्रयोगःस्यात् तस्मादाख्यातवाच्यःकर्तेतिसिद्धमितिपूर्वपक्षसंक्षेपः अत्राहुःतस्यहिशब्दस्यायंप्रकारांत

रेणनलभ्यते अनन्यलभ्यःशब्दार्थइतिन्यायात् अतएवनगंगायदस्यतीरमर्थःलक्षणयेवप्रतीतिसंभवात् अतएवचनवाकार्थप्रतीतिः एवंचा

ख्यातवाच्यस्तावीयंसकर्तारंविनानुपपन्नातमाक्षिपतीतिआक्षेपादेवकर्तुःप्रतिपत्तिसंभवेकिमितितद्वाचकत्वंआख्यातस्यकल्पनीयम् नचविनिगमनावि

रहः कृतिमान्हिकर्ता एवंचकृतेरेवभावनापर्यायायाः आकृत्यधिकरणन्यायेनाख्यातवाच्यत्वसंभवेनतद्वतःकर्तुर्वाच्यत्वंकल्पनीयम्गौरवप्रसं

गात् नचभावनाकारकांतरेणापिसंबद्धातदुक्त्वान्यूनोदितिकर्तारमाक्षिपतीतिवाच्यम् साहित्यथाव्याप्तिनकर्त्रासंबद्धानतथाकरणादिकान्तरेणेतितृ

तीयादिश्रुतियातदेनाक्षेपात् अतःप्रथमंसाकर्तारमेवाक्षिपतिनकारकान्तरम् अतएवचाख्याताभिहितासंख्यानकारकान्तरेणसंबध्यतेतस्यप्रथममनुपस्थितेः अतएवतृ

तीयादिविभक्तीनांकरणादिवाचित्वम् भावनायाक्षेःसहनिपत्तसंबंधाभावेनतथात्वेपानियमेनानाक्षेपात् आख्यातश्रवणात्प्रागपितृतीयादिविभक्तिश्रवणेकरणा

दिप्रतीतेर्जायमानत्वाच्च नचप्राक्शसंख्याकथमशाब्देनकर्त्रान्वेतीतिवाच्यं कर्तृलक्षणांगीकारात् यथाचलक्षितंतीरंप्राव्देनघोषेणान्वेति एवंलाक्षितःक

र्त्ता एकत्वेनान्वेष्यतिअतएवचदेवदत्तःपचतीतिसामानाधिकरण्यमुपपद्यते कर्तृलक्षणात् नचमुख्येसंभवतिकिमितिलाक्षणिकत्वंत्वीकार्यमितिवाच्य

म् अनन्यलभ्यशब्दार्थत्वस्यव्यापितत्वात् अन्यथाभिन्नोदेवदत्तश्चत्वातिसामानाधिकरण्यंपमुख्यम् किंचआख्यातवाच्यःकर्तेतिवादिनोपिमतेदेवदत्तः पचतीतिसा

मानाधिकरण्यंतमुख्यंतमेतआख्यातेनतृतीयानतिश्रोतृशक्तिमात्रकर्तृकारकाभिधानात् शक्तिमदद्रव्यस्याकृत्यधिकरणन्यायेनानभिधानाद्देवदत्तस्य

कार

न्यप्र साचेयं पर्णताऽनारभ्याधीतप्रकृतौ निवेशनीया विकृतौ वेति संदिह्यानारभ्याधीतत्वादुभयत्रैव किं न स्यादाशंक्य परिहरति प्रकृतौ वा द्विरुक्तत्वादिति वा शब्दोऽवधारणार्थकः प्रकृतावे
न स पापं श्लोकं शृणोतीति २ वेत्यर्थः अन्यथा विकृतौ चोदकेनापि प्राप्तिसंभवाद्द्विरुक्तत्वापत्तेः १
उक्तं तदिदं लिंग [illegible] दं लिंगवाक्यादिभ्यो बलवत् तेषां हि न साक्षाद्विनियोजकत्वं किंतु श्रुतिं कल्पयित्वा न चासमर्थस्य श्रुतिं कल्पयित्वा विनियोगकल्पना संभ
वति सामर्थ्यस्यापि कल्पितत्वेनोपजीव्यत्वात् अतस्तेषां यावत्सामर्थ्यं कल्पयित्वा श्रुतिः कल्प्यते तावदेव क्लृप्तेन सामर्थ्येन श्रुतिं कल्पयित्वा विनियोगः क्रियत इति तस्य
प्राबल्यं अत एव स्योनं ते सदनं कृणोमि घृतस्य धारया सुशेवं [illegible] कल्पयामीत्यस्य सदनांगत्वे लिंगात् न तु वाक्यात् सादनांगत्वं तस्य दौर्बल्यादिति समभिव्याहारो
वाक्यं समभिव्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोः सहोच्चारणं यथा यस्य पर्णमयी जुहूर्भवति अत्र हि न द्वितीयादिविभक्तिः २
४ श्रूयते केवलं पर्णताजुह्वोः समभिव्याहारमात्रं तस्मादेव च पर्णताया जुह्वंगत्वं न चानर्थक्यं जुहूशब्देन पूर्वलक्षणात् तदयं वाक्यार्थः पर्णतया अवत्तहविर्धारण
द्वारा यदपूर्वं साधनं तत् भावयेदिति एवं च पर्णताया यदि जुह्वः क्रियते तदेव तत्साध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यं अवत्तहविर्धारणद्वारेति चावश्यं वक्त
व्यं अन्यथा स्रुवादिष्वपि पर्णतापत्तेः सा चेयं पर्णताऽनारभ्याधीता न सर्वक्रतुषु गच्छति विकृतिषु चोदकेनापि प्राप्तिसंभवेन हि द्विरुक्तत्वापत्तेः किंतु प्रकृतिषु तदुक्तं प्रकृतौ
त वा द्विरुक्तत्वादिति अत्र विकृतिर्यतो गामिनं कृतिसा प्रकृतिरिति न प्रकृतिशब्देन विवक्षितं गृहमेधीये पर्णताया अप्राप्तिप्रसंगात् न हि गृहमेधीयं कस्यचन विकृति
रंगानि गृह्णाति मानाभावात् किंतु चोदकाद्यंगानां प्राप्तिस्तत्कर्म प्रकृतिशब्देन विवक्षितं यथा दर्शपूर्णमासौ तत्र हि न चोदकादंगप्राप्तिः प्रकरणाद्वित्तैरेवा
गतैराकांक्ष्यात् गृहमेधीयादिष्वपि न चोदकादंगप्राप्तिः कृतोपकारैराज्यभागादिभिर्नैराकांक्ष्यात् अतो यत्र चोदकाऽप्रवृत्तिस्तत्रानारभ्याधीतानां संनिवेशः साप्तदश्यं
त्वनारभ्याधीतमपि न [illegible] कृतौ गच्छति प्रकृतेः पांचदश्यावरोधात् किंतु विकृतिषु गच्छति तत्रापि न सर्वासु गच्छति चोदकप्राप्तपांचदश्यबाधप्रसंगात् किंतु प्रत्यक्ष
तः प्राप्तदशपांच मित्रविंदादिषु गच्छति यथाहुः एवं च प्रकृतावेतत्पांचदश्यं प्रतिष्ठितं विकृतौ च न प्रत्याप्तिसाप्तदश्यं प्रश्नः श्रुतिरिति न च वाक्यवैयर्थ्यं अनारभ्या
धीतस्यैव साप्तदश्यस्य मित्रविंदादिप्रकरणस्थेन वाक्येनोपसंहारात् उपसंहारो नाम सामान्यप्राप्तस्य विशेषे नियमनं यथाहुः सामान्यविधिरस्पष्टः संह्रिये
त विशेषत इति तत्रानारभ्यविधिः सामान्यविधिः मित्रविंदादिप्रकरणस्थस्तु विशेषविधिरित्यलं तावत् प्रकृतमनुसरामः तदित्थं वाक्यादंगत्वं तदिदं वाक्यं
प्रकरणाद्बलीयः प्रकरणं हि न साक्षाद्विनियोजकं तद्धि आकांक्षारूपं न चाकांक्षा स्वयं प्रमाणं किंतु साकांक्षे वाक्यं दृष्ट्वा भवत्येतादृशी मतिः नूनमिदं वा राम

वत्समाख्यमाप्रषयागेन सामान्यसंबंधोऽवगम्यते तावत्प्रकरणाद्दर्शपूर्णमासाभ्यामेव सामान्यसंबंधोऽवगतः समाख्यातस्तस्य बलीयस्त्वात् अतएव पौरोडाशिकमिति स
माख्याते ब्राह्मणे आम्नातानामपि प्रयाजानां प्रकरणात् सान्नाय्योपांशुयाजांगत्वमपीतिक्रमम् किंच याज्यानुमंत्रणसमाख्यया यिन पूषयागेन सामान्यसंबंधोऽवगम्य
ते किंतु यागमात्रेण प्रकरणेन तु दर्शपूर्णमासाभ्यामेव विशेषेण संबंधोऽवगम्यते अतः प्रकरणात् झटिति तत्संबंधस्यैवावगतत्वात् तदर्थत्वमेव तेषां युक्तम् पूषेति शब्दस्य पु
ष्टातीति व्युत्पत्त्या कथंचिदग्न्याद्यभिधायित्वात्तमेव पूषानुमंत्रणमंत्रे हि श्रूयमाणे एव एवमवगम्यते पूषाभिधानसमर्थत्वात् अयं मंत्रस्तत्प्रकाशनार्थ इति लवनमंत्र इ
वं लवनप्रकाशनार्थः न तत्र प्रकरणाद्यपेक्षायेन तेषामुपजीव्यत्वेन प्राबल्यं स्यात् प्रकरणात्तु दर्शपूर्णमासार्थत्वे तस्य चावश्यं लिंगकॢप्तिकल्पनेन विनियोजकत्वात्
[illegible] भावः
लिंगस्योपजीव्यत्वेन प्राबल्यम् अतो लिंगात्पूषदेवताप्रकाशनार्थत्वे वगते तन्मात्रप्रकाशनमनर्थकमित्यपूर्वसाधनपूषप्रकाशनार्थत्वं वक्तव्यं किंतु दपूर्वमित्य
पेक्षायां याज्यानुमंत्रणसमाख्यानगृहीताल्लिंगात्पूषयागापूर्वसंबंधिदेवताप्रकाशनार्थोपमित्यवगम्यते अतो यद्यपि समाख्यातः प्रकरणं बलीयस्तथापि तस्य लिंगेन
बाधितत्वात् समाख्याया दुर्बलाया अपि प्रबललिंगाश्रितत्वेन प्राबल्यात्तेषां सामान्यसंबंधे प्रमाणं दुर्बलस्यापि प्रबलाश्रितस्य प्राबल्यात् अतएव कृत्स्नयेत्तु यादुर्बला
वेदं कृत्वा वेदिं करोतीति तां [illegible] धर्मी भूत क्रम बोधक श्रुत्यपेक्षया [illegible] दुर्बलत्वेपि क्रमस्य [illegible] प्रबल पदार्थाश्रितत्वेन प्राबल्याद्वेदकरणानन्तरं तत्र तत्र स्तृणाति आचमन
यापि श्रुतेः एवमनुक्रमप्रबलपदार्थाश्रितत्वेन प्राबल्यात्पदार्थधर्मगुणाभूतश्रौतक्रमत्यागेन वेदकरणानन्तरं तत्र आचमनमेव कार्यमित्युक्तम् यथाहुः श्रुत्यंतबल
पूषेतिशब्दस्य तस्मात् [illegible]
वंतोपि योरज्ञानपदाज्ञनाः दुर्बलैरपि बाध्यंते पुरुषैः पार्थिवाश्रितैरिति यत्पूषेति शब्दः कथंचिदग्न्याद्यभिधायीति तत्र तस्माद्दंतकोहीत्यादिवाक्यशेषेण वैदिकप्रसिद्ध्या
चापि विशेषे रूढत्वात् रूढेश्चावयवार्थालोचनसव्यपेक्षायोगाद्बलीयस्त्वात् अतएव वर्षासु रथकारोऽग्नीनादधीतेत्यत्र रथकारशब्देन सौधन्वनापरपर्यायो-
वर्णविशेष उच्यते रूढेः प्राबल्यात् न तु रथं करोतीति व्युत्पत्त्या द्विजातियोगस्य दौर्बल्यादित्युक्तं षष्ठे तस्माद्युक्तं समाख्यया सामान्यसंबंधे च गते सामर्थ्यात्पूष
यागसंबंधः पूषानुमंत्रणमंत्राणामिति यथाहुः याज्यानुमंत्रणानीति समाख्या कृत्तयोजिका तस्माच्छ्रुत्यनुरोधेन प्राप्तितद्देवतेकृत्ता वितितत्सिद्धं प्रमाणांतरसिद्धसामान्य
संबंधस्य पदार्थस्य विनियोजकं लिंगमिति तत्र मंत्रविनियोजके लिंगं मुख्य एवार्थे न गौणे मुख्यार्थस्य प्रथममुपस्थितत्वेन तत्रैव विनियोगबुद्धेः पर्यवसन्नात्वात्पुन
र्गौणेऽर्थे विनियोगकल्पनायां गौरवप्रसंगात् अतएव बर्हिर्देवसदनं दामीति मंत्रसामर्थ्यात्कुशलवनांगत्वेपि मुख्यत्वात् न तु उलपराजिलवनांगमि

पूप्र ७

न्वाधानव्रतप्रवेशशाखाहरणोपावर्हिराहरणवेदीकरणोपवेशकारणकुंभालेपनान्यमावास्यप्रातःकृत्यानि अपराह्णे पिंडपितृयज्ञः कर्मांतरं न तु दर्शांगं अमावास्यायां रात्रौ पवास्याग्निहो
त्रयमयोदोहनादयातं चनीतं साधं दोहकर्म ततो ग्निपरिस्तरणं आरण्यप्रानमितिसर्वकर्मसूर्योदयान्युग्मोवजले महस्त्रावनेजनं अलपराजीतरणं पुरीतापूरणपन हविर्निर्वापः
श्रुतिवर्मिवा एतदाज्ञस्य क्रियते यत्प्रयाजानुयाजा ... आरत्वेतत्स्याद्याः कर्मप्रदेशाद्युपकारककर्मयदं द्रव्यसंस्कारकर्मणः पृथक्त्वेकीर्तनादित्याति
तावत्तदिदं प्रकरणं क्रियाया एव विनियोजकं न द्रव्यगुणयोः तयोः क्रियायोगाद्विनियोजकं कुतइतिचेत् श्रुत्याः यजेत स्वर्गकामइत्यत्र आख्यातांशेनार्थीभावना
भिधीयते भावयेदिति सा चांशत्रयमपेक्षते किंभावयेदिति केनभावयेत्कथंभावयेदिति तत्र भाव्याकांक्षायां श्रुत्यादिन्यायेन स्वर्गो भाव्यतयान्वेति स्वर्गं भावयेदिति
करणाकांक्षायां समानपदोपात्तो यागो भावार्थाधिकरणन्यायेन करणतयान्वेति यागेन स्वर्गं भावयेदिति ततः कथमिति कथंभावाकांक्षा जायते तस्यांच
कांक्षायां यत्संनिधौ पठितमश्रूयमाणफलं च क्रियाजातं तदेवोपकारकतयामिति कर्तव्यतात्वेनान्वयमनुभवितुं योग्यम् क्रियाया एव लोके कथंभावाकांक्षा
यामन्वयदर्शनात् नहि कुठारेणछिन्द्यात् कथमित्याकांक्षायां हस्तामिरिति केवलमुच्चार्यमाणोपि हस्तोऽन्वयं प्राप्नोति किंतु हि हस्तेनोद्यम्य नियात्य
उच्चार्यमाणोद्यमननिपातनेएवं हस्तोपि तद्द्वारेणैवान्वयं प्राप्नोतीति सार्वजनीनमेतत् किंच कथंभावाकांक्षा नाम करणगतप्रकाराकांक्षा प्रकारः प्र
७ कारवाचित्वात् सामान्यस्य भेदको विशेषः प्रकारः सामान्यं च क्रियारूपमेवाख्यातेनोच्यते यजेत स्वर्गकाम इत्यस्य हि अयमर्थः यागेन तथा कर्तव्यं पञ ७
मथा यागात्त्वोसिभवतीति क्रियासामान्यस्यच विशेषः क्रिययैवभवति नहि ब्राह्मणविशेषः मरिव्राजकादिर्ब्राह्मणो भवति एवं च करणगत क्रियाविशेषाकां
क्षायां नामधेयकथंभावाकांक्षायां क्रियैवान्वेतीति युक्तं सच करणगतः क्रियाविशेषोऽन्वाधानादिर्ब्राह्मण... णतर्पणतः क्रियारूप एवेति युक्तं तस्य प्रकरणेन
ग्रहणं तस्य च करणगतत्वं तदुपकारकत्वमेव तेन विना यागेनापूर्वाजननात् न सुद्यमनिपतनव्यतिरेकेण कुठारेणद्वैधीभावो जन्यते तस्मिंस्तु कथं
भावाकांक्षायां क्रिययैवान्वेतीति ... तत एव द्रव्यदेवतयोर्यागसंपादनद्वारान्वयः सांप्रदायिकैरुक्तः विकृतौ च कथंभावाकांक्षायामुपकारसंपादनमति
दिश्यत इत्युक्तं यदि च कथंभावाकांक्षायां सिद्धंवस्त्वन्वयायोग्यमात्रसंपादनपर्यंतं धावनं ग्रंथकारणामनर्थकंस्यात् अतश्च क्रियाया एवेतिकर्त
व्यतात्वं कथंभावाकांक्षागृहीतस्य इतिकर्तव्यतात्वात् इतिशब्दस्य प्रकारवाचित्वात् कर्तव्यस्येतिप्रकार इतिकर्तव्यता प्रकर्षश्च सामान्यस्य
भेदको विशेष इत्युक्तं कर्तव्यस्य च विशेषः कर्तव्य एव भवतीति न सिद्धस्य वस्तुन इतिकर्तव्यतात्वं किंतु क्रियाया एव सिद्धस्य तु द्रव्यादेः केवल
विनाशात्त्वं हविःश्रोतणं हविरधिश्रयणं हविः प्रेषणं कपालोपधानं पुरोडाशः संवापः पुरोडाशकरणं पुरोडाशाधिश्रयणं ... नादि स्रुक्संमार्जनं पत्नीसन्नहनं आज्यनिर्वापः
स्पग्रहणं ... प्रोक्षणं बर्हिषावेधा ... पुरोडाशोद्वासनं पुरोडाशाप्यायनं पुरोडाशाभिमंत्रणं ... सन्निधिने ... समिधः ... प्रयाजाज्यभा

अग्नेरिदं हविरजुषतावीवृधत महो ज्यायोऽकृतेतीमदर्थं हविरजुषतावीवृधत महो ज्यायोऽकृत तदग्निरिदं हविरजुषतावीवृधत महो ज्यायोऽकृताग्नीषो
माविदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्रातामिन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्रातामिन्द्र इदं हविरजुषतावीवृधत महो ज्यायोऽकृत
देवा इदं हविरजुषतावीवृधत महो ज्यायोऽकृतेत्यादौ
कं केन चिह्नाकोऽनेकवाक्यभूतमिति तत आकांक्षादिरूपं प्रकरणं वाक्यस्य वाक्यांतरैकवाक्यत्वे प्रमाणं एवं च यथा चत्प्रकरणं वाक्यैकवाक्यं कल्पयित्वा विनियोजकं भव
ति तथैव वाक्यं लिंगश्रुती कल्पयित्वा विनियोजकं भवतीति प्रकरणाद्वाक्यं बलीयः अत एव इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्रातामित्यत्रै
न्द्राग्नीपदस्य लिंगाद्दर्शांगत्वे सिद्धे इदं हविरित्यादेरपि तदेकवाक्यत्वाद्दर्शांगत्वं न तु प्रकरणाद्दर्शपूर्णमासांगत्वं प्रकरणाद्वाक्यस्य बलीयस्त्वादिति उभया
कांक्षा प्रकरणं यथा प्रयाजादिषु समिधो यजतीत्यत्र चतुर्थ्यविशेषस्यानिर्देशात्ताभिधानेन भावयेत् किमित्यस्त्युपकार्याकांक्षा पूर्णमासांगत्वं सिद्धमिति न तु
यदि प्रयाजादिवाक्येऽपि दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् कथमित्यस्त्युपकारकाकांक्षा अत उभयाकांक्षया प्रयाजादीनां दर्शपूर्ण
विशेषेण श्रूयते तर्हि विश्वजिन्न्यायेन स्वर्गः फलं कल्प्यतां विश्वजिदधिकरणे हि विश्वजिता यजेतेत्यत्र फलस्याश्रवणात् फलमन्तरेण च विधिश्रुतेर
नुपपत्तेरवश्यं फले कल्पयितव्ये सर्वाभिलषितत्वेन स्वर्गः फलमित्युक्तम् तदुक्तम् स स्वर्गः स्यात् सर्वान्प्रत्यविशिष्टत्वादिति रात्रिसत्रन्यायेन वाऽर्थवादिकं फलं कल्प्य
तां रात्रिसत्राधिकरणे हि प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यत्र विध्युद्देशे फलाश्रवणात् फलमन्तरेण च विधिश्रुतेरनुपपत्तेरवश्यं फले कल्पयितव्ये अर्थवा
दिकं प्रतिष्ठादिकं फलमित्युक्तम् विश्वजिदधिकरणन्यायेनानुपस्थितस्वर्गकल्पने तस्य प्रकृतसंबंधकल्पने गौरवात् अर्थवादोपस्थितस्यैव प्रकृतफल
कल्पने लाघवात् तदुक्तम् फलमात्रेयो निर्देशादश्रुतौ ह्यनुमानं स्यादिति तस्माद्विश्वजिन्न्यायेन रात्रिसत्रन्यायेन वा स्वतंत्रफलार्थत्वे संभवति किमि
ति दर्शपूर्णमासांगत्वं स्वीक्रियत इति चेत् मैवम् स्वतंत्रफलार्थत्वे न्यूनाकांक्षया संबंधः स्यात् न स्वतंत्रफलस्य साधनाकांक्षाऽस्ति क्रियमाणं हि फलं
साधनमाकांक्षति न चात्र तत् क्रियते एवं च फलस्याकांक्षाभावात् केवलं किं भावयेदिति प्रयाजानां भाव्याकांक्षायै वस्वतंत्रफलार्थत्वं स्यात् दर्शपूर्णमा
सार्थत्वे तूभयाकांक्षा प्रमाणं प्रयाजानां भाव्याकांक्षाया इतरत्र च कथंभावाकांक्षायाः सत्त्वात् अन्यतराकांक्षातश्चोभयाकांक्षा बलीयसीति च स्व
तंत्रत्वं दर्शपूर्णमासार्थत्वमेव युक्तम् न स्वतंत्रफलार्थत्वमिति तदुक्तम् द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति अत एव फ
लश्रुतिर्यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्येवमाद्याः संस्कारे फलश्रुतिर्यदांक्ते चक्षुरेव भ्रातृव्यस्य वृंक्त इत्येवमाद्याः कर्मणि फल

दुंवरत्वं तत्प्रकरणाद्गृह्यते न तु न तत्प्रकरणाद्गृह्यते अक्रियात्वात्. क्रियाया एव प्रकरणग्राह्यत्वादिति चेत् सत्यम्. तथापि तावद्विधीयमानस्योदुंवरत्वस्यास्यैवा
कांक्षा किं भावयेदिति न च यूपांगत्वादेनं तस्य विधीयमानत्वात्. यूपस्य चादृष्टरूपत्वात्तेनैवोदुंवरत्वस्यैकोद्देश्यस्याहवनीयेनेवोधानस्येति वाच्यम्. यूपस्य केवला
दृष्टरूपत्वाभावात्. तस्य हि तत्र यूपत्वे खादिरत्वादिकं केवलादृष्टार्थं स्यात्. न च तत्तथा भवति तथा सति खादिराभावे प्रतिनिधित्वेन कदरोपादानं न स्यात्. अदृष्टार्थ
स्य प्रतिनिध्यभावात्. न हि खादिरजन्यमदृष्टं कदरेण क्रियत इत्यत्र प्रमाणमस्ति. अत एव नादृष्टार्थानां प्रतिनिधिः. तदुक्तम् न देवताग्निशब्दक्रियमन्यार्थत्वादिति. प्र
तिनिधित्वेन चोपादानं कदरादेरुक्तं ग्रंथेषु तस्मान्न यूपस्य केवलादृष्टरूपत्वम् अपि तु दृष्टरूपत्वं [illegible] अपि तु दृष्टोऽसौ ह्याराद्गुणो यूप इति सांप्रदायिकाः
एवं चोदुंवरत्वस्य न यूपमात्रेणनैराकांक्ष्यं दृष्टसंस्कारस्य प्रकारांतरेणापि संभवात्. अतश्चास्त्येवोदुंवरत्वस्याकांक्षा विकृतेरप्यस्ति कथंभावाकांक्षा च तदाश्र
यतिपदोपकारास्तत्पृष्ठभावेन च यदार्थोऽन्वीयते न तूपकारमात्रान्वयेन शाम्यति. अतश्च यथोद्भिद्भावनायाः करणाकांक्षा दध्नाकरणत्वेनान्वये जाते सिद्धरू
करणत्वानुपपत्त्या होमस्याश्रयत्वेनान्वयं यावदनुवर्तते न तु दध्यन्वयमात्रेण निवर्तते. आश्रयत्वेन च गृह्यमाणो होमः करणाकांक्षयैव गृह्यते इत्युच्यते न
त्वाश्रयाकांक्षा नाम चतुर्थी अस्ति. एवं विकृतेः कथंभावाकांक्षा प्रायोपकारान्वयमात्रेण निवर्तते. उपकारपृष्ठभावेन यावत्पदार्थान्वयमनुवर्तते. अतश्चोपकार
कर्तुं अतो नित्यकर्मसु प्रधानमात्रसमर्थोऽधिकारी अंगानि तु यावंति कर्तुं शक्यंते तावंति कार्याणीत्याचार्याचरणं प्राहुः सूरिभिः पराक्रांतत्वात् तत्सिद्धं
फलस्वाम्यबोधको विधिरधिकारवि[illegible]दे वं निरूपितं चतुर्विधभेदनिरू परो[illegible]ऽत्र विधेः प्रयोजनवदर्थपर्यवसानं मंत्राणां तु प्रयोगसम

गुणेन फलं... विधानमित्यर्थः प्रकृतिलक्षणयैवेत्यर्थः ... द्विपशुं भावयेदिति वा

यात् अथ गुणफलसंबंधविधाने गुणस्याश्रयत्वेन संबंध इति चेत् न ... इति चेन्न यजेते यत्राश्रयवाचकपदाभावात् अथास्तु तर्हि करणत्वमि
वाश्रयत्वमपि लक्षणयेति चेत् न आश्रयत्वापेक्षया करणत्वस्य लघुत्वेन तल्लक्षणाया एव युक्तत्वात् फलाय विधीयमानो गुणो यत्र कारक
तामापद्यते स आश्रयः तत्त्वं चाश्रयत्वं करणत्वं च निष्कृष्टा प्रकृतिरिति लाघवं किं च गुणफलसंबंधविधाने करणीभूतो गुणस्तन्निष्ठं वाक
रणत्वं फलोद्देशेन विधेयं तत्राद्यपक्षे करणत्वस्य गुणोपसर्जनत्वेन प्रतीतिर्लक्षणयैव वाच्यात् तृतीयया प्रत्ययार्थत्वात् प्राधान्येनोप
स्थितेः यदापि गुणनिष्ठं करणत्वं फलोद्देशेन विधेयं तदापि फलभावनायां करणत्वेनान्वययोग्यगुणनिष्ठकरणत्वोपस्थितिर्लक्ष
णयैव वाच्यात् तृतीयाभिहितस्य करणकारकस्य क्रियामात्रान्वययोग्यस्य ... करणत्वेनान्वयायोग्यत्वात् करणशब्देनाभिहितं करणत्
वादि वि... तृतीयातः तृतीयोत्पत्तिप्रसंगात् पशुकामपदस्यापि स्वरसतः फलपदस्य काम्यमानानुवादित्वे आनर्थक्यापत्तेश्च न च नियम
अतश्च करणत्वेनान्वययोग्यगुणनिष्ठकरणत्वोपस्थितिर्लक्षणयैव वाच्या लक्षणया चोपस्थितकरणत्वस्य करणीभूतस्य गुणस्य यत् फलभावना
यां करणत्वं तदपि लक्षणयैव वाच्यं क्रियमाणया तृतीयया गुणकर्तृस्याङ्गभूतिकरणत्वाभिधानात् अत एव ... चतुर्थे करणीभूतगोदोहन
देः पश्वर्थत्वं समभिव्याहारादित्युक्तं अतश्च गुणफलसंबंधविधाने धातोरत्यन्तपारार्थ्यादिबहुदोषवत्त्वात् उद्भिदादिवद्गुणसमर्पकत्वेन गुणविशिष्टकर्मविधा
नमेव स्वीकार्यं तथा सति हि यजिना लघुभूतं करणत्वमात्रं लक्ष्यं उद्भिदादिवच्च प्रकृत्यंशेन मत्वर्थलक्षणालक्ष्यमिति गुणफलसंबंधविधानाल्लाघवं
भवति धातोरत्यन्तपारार्थ्यादिकं तु न भवत्येव धात्वर्थस्यैव फलोद्देशेन विधानात् अतश्चोद्भिदादिवद्गुणसमर्पकत्वेन मत्वर्थलक्षणया गुणविशि
ष्टकर्मविधानं स्वीकार्यं न तु उद्भिदा यागेन पशुं भावयेदिति कर्मनामधेयत्वे तु उद्भिदादिवद्यस्य न मत्वर्थलक्षणा मुख्ययैव वृत्त्या यजिना सामाना
दिकरण्येन तस्यान्वयसंभवात् उद्भिदा यागेन पशुं भावयेदिति संभवति च मुख्यार्थलक्षणाश्रयित्वं न युक्तासंनिकृष्टविधानं तु समानमेव न चैवं सो
गोदोहनेन पशुकामस्य प्रणयेदिति विषयवाक्यं द

अबाधितार्थस्य

यथास्तोत्रशस्त्रादीनां१

विशेषपर्यवसायितया१

त्याः१

स्यत्वाद्गौरुषार्थत्वं सर्वथापि तत्तेषां नानर्थक्यमिति नामधेयानां विधेयार्थपरिच्छेदकत्वार्थवत्त्वं तथाहि उद्भिदा यजेत पशुकाम इत्यत्र हि उद्भिच्छब्दो यागना
मधेयं तेन च विधेयार्थपरिच्छेदः क्रियते अनेन हि वाक्येनाप्राप्तत्वात्फलोद्देशेन यागो विधीयते यागसामान्यस्य चाविधेयत्वाद्यागविशेष एव विधीयते
तत्र कोऽसौ विशेष इत्यपेक्षायामुद्भिच्छब्दात् उद्भिद्रूपो याग इति ज्ञायते उद्भिदा यागेनेति सामानाधिकरण्येन नामधेयान्वयात् तस्य च यजिना सामाना
धिकरण्यं न नीलोत्पलादिशब्दवत् तत्र हि उत्पलशब्दस्यार्थादुत्पलादन्यो नीलशब्दस्य वाच्योऽर्थोऽस्तीति नीलगुणः लक्षणया तत्र नीलशब्दस्य द्र
व्यपरत्वेन सामानाधिकरण्यं उद्भिच्छब्दस्य तु पञ्चवगतयागविशेषान्नान्यो वाच्योऽर्थोऽस्ति विशेषवाचित्वात्तस्य अतश्चार्थान्तरवाचित्वाभावेन नना
मधेयस्य नीलशब्दवत् सामानाधिकरण्यं किंतर्हि वैश्वदेव्यामिक्षेत्यत्र आमिक्षाशब्दवत् वैश्वदेवीशब्दस्य हि देवतातद्धितान्तत्वात् तद्धितस्य च सापेक्षत्वे विशेष इत्य
पेक्षायामामिक्षापदसंनिधानादामिक्षारूपो विशेषः इत्यवगम्यते यथाहुः आमिक्षां देवतायुक्तां वदत्येवहि तद्धितः आमिक्षापदसान्निध्यात्तस्यैव विषयार्पणमि
तित्तथा श्रुत्यैवोपपदस्यार्थः सर्वनाम्ना प्रतीयते तदर्थस्तद्धितेनैव त्रयाणामेकवाक्यतेति तस्माद्यथा वैश्वदेवीशब्दस्य विशेषसमर्पकत्वेनामिक्षापदस्य वैश्वदे
वीशब्देन सामानाधिकरण्यं एवमस्मान्यस्याविधेयत्वादप्यवगतयागविशेषसमर्पकत्वेन नामधेयस्य यजिना सामानाधिकरण्यं तत्सिद्धं नामधेया
नां विधेयार्थपरिच्छेदकत्वार्थवत्त्वं यथाहुः तदधीनत्वाद्यागविशेषसिद्धेरिति नामधेयत्वं च निमित्तचतुष्टयात् मत्वर्थलक्षणाभयाद्वाक्यभेद
भयात्तत्प्रख्यशास्त्रात्तद्व्यपदेशाच्चेति तत्रोद्भिदा यजेत पशुकाम इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात् तथाहि उद्भिच्छब्दस्य गुण
समर्पकत्वे यागानुवादेन तावत् गुणविधानं युज्यते फलपदानर्थक्यापत्तेः न चानेन वाक्येन फलं प्रति यागविधानं तस्मिन् गुणविधानं युज्य
ते वाक्यभेदापत्तेः नापि गुणफलसंबंधविधानं संभवति परपदार्थविधानेन विप्रकृष्टार्थविधानापत्तेः धात्वर्थस्य स्वरूपेणाविधानात् तदुद्दे
शेन चान्यस्य कस्यचिदविधानात् धात्वर्थेतराश्रयणे अर्थान्तरकल्पनापत्तेश्च न हि तदानेन करणेन समर्प्यते गुणस्य करणत्वेनान्व

सर्वनाम्ना श्रुत्या उपपदस्यार्थः प्रतीयते इति सामानाधिकरण्येनान्वयः १   गुणेन फलसंबंधानादित्यर्थः १

[illegible]

[illegible]

तन्नेह षं प्राजापत्यमित्यत्र षं षद्रूव्यकं प्रजापतिर्यागो निष्ठं भावयेति विहितस्य फलाकांक्षायाः फलविशेषाकांक्षायाः इत्यर्थः ३
२० नेत्संभवति एकप्रसरताभंगलक्षणवाक्यभेदापत्तेः उद्देश्यविधेयभावस्यानेकपदसाध्यत्वात् अत एव च षट्कर्तुः प्रथमभक्ष इत्यत्र विध्युद्देशे विशिष्ट
भक्षविधिर्न तु भक्षानुवादेन प्राथम्यविधिरित्युक्तं तृतीये मेष्यनुवादेन चित्रत्वविधाने फलपदानर्थक्यापत्तेश्च उभयविधाने वाक्यभेदात् प्रकृतस्य च
यागस्य फलाकांक्षायाश्च निवृत्तेः विश्वजिन्न्यायेन फलकल्पनायां गौरवम् दधिमधुघृतादि इत्युत्पत्तिवाक्यैर्नेतस्याधिकारवाक्यस्य प्रतिपन्नैकवाक्य
तावाधेन वाक्यभेदप्रसंगाच्च चित्राशब्दस्य तु कर्मनामधेयत्वे प्रकृतस्य कर्मणः फलाकांक्षस्य फलसंबंधमात्रकरणान्न वाक्यभेदः प्रकृतायाश्चेष्टेरने
कद्रव्यकत्वेन चित्राशब्दस्य तत्रोपपत्तेः तत्सिद्धं वाक्यभेदभयाच्चित्राशब्दः कर्मनामधेयमिति अग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्दस्य कर्मनामधेयत्व
म् तत्प्रख्यशास्त्रात् तस्य गुणस्य प्रापकस्याप्रापकस्य शास्त्रस्याविद्यमानत्वेनाग्निहोत्रशब्दः कर्मनामधेयमिति यावत् तथा हि विधिना तावत्तदेव
20 विधेयं यत्प्रकारान्तरेणाप्राप्तं अप्राप्ते शास्त्रमर्थवदिति न्यायात् अग्निहोत्रशब्दस्य च गुणविधित्वे यो गुणस्तेन विधेयः स शास्त्रान्तरेण प्राप्तः कथमि
ति चेच्छृणु यदि तावदग्नौ होत्रमस्मिन्निति सप्तमीसमासमाश्रित्य होमाधारत्वेनाग्निर्विधेय इत्युच्येत तदा यदाहवनीये जुहोतीत्यनेनैव प्राप्तत्वा
द्विध्यानर्थक्यम् अथाग्नये होत्रमस्मिन्निति चतुर्थीसमासमाश्रित्याग्निरूपा देवतानेन समर्प्यत इति चेत्तन्न शास्त्रान्तरेण प्राप्तत्वात् किं तच्छास्त्रां
तरमिति चेदत्र केचित् यदग्नये च प्रजापतये च सायं जुहोतीति शास्त्रान्तरेण होमानुवादेनाग्निप्रजापत्योर्विधानादग्निहोत्रस्य द्वंद्वदेवतासमर्प्य
कम् न चोभयविधाने वाक्यभेदः परस्परनिरपेक्षविधाने हि वाक्यभेदः स्यात् अग्नये जुहोति प्रजापतये जुहोतीति प्रत्येकं विधिद्वयाभावात् चश
ब्दश्रवणात् परस्परसापेक्षत्वेनैकपदद्वयस्याख्यातान्वयान्न वाक्यभेदः अत एव अश्विभ्यां दक्षिणां ददातीति वाक्यविहितदक्षिणानुवादेन गोऽश्वा
श्वश्चाश्वतरश्चादिभश्चाजाश्चाश्रववयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणेति वाक्येन गवादीनां विधानं दशमोक्तं संगच्छ
ते परस्परसापेक्षाणां गवादीनां विधाने न वाक्यभेदाभावात् अन्यथा दक्षिणानुवादेनानेकेषां गवादीनां विधानं नैव संगच्छेतेति अग्निप्रजा
पत्योश्च देवतयोः षष्ठ्योः समुच्चयो न तु समुच्चितयोर्देवतात्वं मप्यकारकविभक्तिश्रवणात् चकारार्थस्य चकारकार्थेनान्वयात्तस्य प्राधान्यात्

प्राणिधर्मत्वात्प्रकृते दध्यादिद्रव्यं के कर्मणि निवेशायोगात् नानेनवाक्येन प्रकृते कर्मणि गुणविधानं किंतु ५

मेन यजेतेत्यत्रापि सोमपदस्य यागनामधेयत्वापातेपि गुणविधित्वे मत्वर्थलक्षणापत्तेरिति वाच्यं सोमपदस्य लतायां रूढत्वेन यागनामधेयत्वानुपपत्तेर
गत्या लक्षणाश्रयणात् उद्भिच्छब्दस्य तु नैवं वाच्योर्थः कश्चित्प्रसिद्धः उद्भिद्यतेनेनेति योगस्य तु गुणद्रव्यपरोपि फलोद्भेदनकारित्वानुपपत्तेः तत्ति
द्धं उद्भिच्छब्दस्य मत्वर्थलक्षणाभयाद्यागनामधेयत्वमिति चित्रया यजेत पशुकाम इत्यत्र चित्राशब्द इष्टवाक्यभेदभयाद्यागनामधेयत्वं तथाहि
न तावदत्र गुणविशिष्टयागविधानं संभवति दधि मधु पयो घृतं धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्यमित्यनेन विहितत्वाद्यागस्य विशिष्टविधा
नानुपपत्तेः प्राप्तस्य च यागस्य फलसंबंधे गुणसंबंधे च विधीयमाने वाक्यभेदः अथ चित्राशब्दात् चित्रत्वस्त्रीत्वयोः पुंस्त्वे स्त्रीत्वस्य चाभावात् प्रा
प्रथमे ६ णिधर्मत्वात्तत्रास्य वाक्यस्यानारभ्याधीतत्वात् अनारभ्याधीतानां च प्रकृतौ वा द्विरुक्तत्वादिति न्यायेन प्रकृतिगामित्वात् सा च दुग्धकाण्ड
च यागानां देवस्य चेतरेष्विति न्यायेनाग्नीषोमीयप्रकृतिकत्वात्तदनुवादेनानेन वाक्येन गुणविधिः एतेन देवस्य च ज्योतिष्टोमांगत्वेन स्वतंत्र
फलाकांक्षायाः अभावात् पशुकामपदं न फलसमर्पकं किंतु अग्नीषोमीयपशुर्यजेत तत्र याग पशुकामनानुवादः तथा च न वाक्यभेद इति
चेत् न तथापि देवानुवादेन चित्रत्वस्त्रीत्वविधाने वाक्यभेदात् विशिष्टकारक विधाने पि गौरवलक्षणो वाक्यभेद एव कारकस्या
पि प्राप्तत्वेन विशिष्टविधानानुपपत्तेश्च पशुकामपदस्यापि स्वरसतः फलपरस्य काम नानुवादित्वे प्रानर्थक्यापत्तेश्च न च नियमतः पश्वर्जे
नकामना भवति कामनातः प्रागेव केनचिद् दृष्टे पश्वौ तदभावात् तथा च पशुकामपदस्य नित्यवच्छ्रवणाबाधः देवस्य चोत्पत्ति शिष्टपुंस्त्वावरुद्ध
त्वेन तत्स्वसंनिधि पठितेन च कृष्णसारंगवर्णेनावरुद्धे चित्रत्वस्यानारभ्याधीतेन सामान्यशास्त्रेण विधानानुपपत्तेश्च यांचदश्यावरुद्धत्व
सापदस्य विधानं अथ माभूत् अग्नीषोमीयपश्वनुवादेन चित्रत्वस्त्रीत्वविधानं सारस्वतीमेषीति वाक्यविहितयागांगमेष्यनुवादेन गुणविधानं
स्यात् चित्रयेति स्त्रीकारकानुवादेन चित्रत्वमात्रस्य विधानात् न च प्राकृतेन कृष्णसारंगवर्णेन नैराकांक्षात्र चित्त्वविधानं युक्तमिति वाच्यं तत्प
दिष्टेन चित्रत्वेनातिदिष्टस्य वर्णांतरस्य बाधोपपत्तेरिति चेत् मैवं न हि चित्रयेत्येकेन पदेन स्त्रीकारकस्योद्देशः चित्रत्वस्य च विधा

२१ यत्तिविधेरेकेनैववाक्येनसिद्धेर्यदग्नयेचप्रजापतयेचसायंजुहोतियत्सूर्यायचप्रजापतयेचप्रातर्जुहोतीतिवाक्यद्वयंव्यर्थमितितन्नभवेद्व्यर्थंयदि
प्रजापतिमात्रविधानंविवक्षितंस्यात् सायंहोमेअग्निसमुच्चितप्रजापतिविधानेप्रातर्होमेसूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेतिमंत्रवर्णप्राप्तसूर्यसमुच्चि
तप्रजापतिविधानंरद्दितं नचैतदेकेनवाक्येनसिध्यतिअतोर्थवद्वाक्यद्वयं यत्तुअग्नेर्मान्त्रवर्णिकत्वेमंत्रवर्णस्याग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायंजु
होतीतिवाक्येनसायंहोमेविनियुक्तत्वात् तत्प्रकाश्यस्याग्नेरपिप्रजापतिसमुच्चितस्यतत्रैवदेवतात्वावगतेर्यदग्नयेचेतिवाक्येनसायं व्यर्थमिति
[illegible] एवंयत्सूर्यायचेतिवाक्येप्रातःप्राप्त्येव्यर्थइति किंचमंत्रवर्णेनज्योतिष्ट्वगुणविशिष्टस्याग्नेःप्रकाशनाद्गुणविशिष्टस्यैवदेवतात्वायातइतित
21 दपिनहोमानुवादेनदेवताद्वयविधानेपिमंत्रवर्णयोर्लिंगादेवप्राप्तिसंभवात्तद्वैयर्थ्यकत्वात् मिश्रलिंगमंत्रविधिपर्युदस्तयोःप्रतिप्रसवा
र्थविधानेपितद्विधिगतयोःसायंप्रातःशब्दयोरानर्थक्यं विधीयमानयोर्मंत्रयोर्व्यवस्थयैवप्राप्तिसंभवात् तत्काश्यपयोर्व्यवस्थितत्वात् अनुवाद- दैवतयो
त्वोक्तिस्तुभयत्रतुल्येतिमांत्रवर्णिकत्वेप्यग्नेःकेवलस्यैवदेवतात्वंनगुणविशिष्टस्य यदग्नयेचेतिवाक्येअग्नेःसर्वाहुतिरित्यत्रचकेवल
या दृ स्यैवाग्नेःसंकीर्त्तनात्केवलस्यैवदेवतात्वावगतेः यथासुपर्णोविहस्यादेर्मांत्रवर्णिकत्वेपिनगुणविशिष्टस्यदेवतात्वंचिह्नहयोभयपक्ष
व्यवस्थार्थवादेकेवलस्यैवसंकीर्तनात्तद्वदिति अतश्चमांत्रवर्णिकत्वेदोषाभावाद्देवताद्वयविधानेचगौरवापत्तेरन्यतःप्राप्तमग्नि
मनूद्यतत्समुच्चितःप्रजापतिरेवात्रविधीयतेहोमानुवादेनोभयविधानेवाक्यभेदप्रसंगाच्चनचचकारश्रवणान्नवाक्यभेदइतिवाच्यं
चकारार्थोहिसमुच्चयः तंचसमुच्चयंयदिचकारःप्राधान्येनब्रूयात् तदाप्राधान्यस्यानेकविशेषणग्राह्यत्वाद्दाहरणादिविशिष्टक्रयवि
धानइवचकारवाक्यद्वयसमुच्चयविधानेवाक्यभेदोनभवेत्तन्नचचकारःसमुच्चयंप्राधान्येनब्रूतेपरोपसर्जनत्वेनैवाभिधानात् अतएवद
र्शमेभाष्यकारैश्चकारस्यसमुच्चयशब्दाद्वैलक्षण्यंप्रतिपादितंसमुच्चयशब्दोहितंप्राधान्येनब्रूतेनचकारः यदिहिप्राधान्येनब्रू

स्मरणान्नास्ति॰॰॰पि
३१ः

अतश्चाग्नीषोमीयवदग्निप्रजापत्योर्देवतात्वमिति अन्ये त्वाचार्या आहुः अग्नये च प्रजापतये च सायं जुहोतीति वाक्येनाग्नेः प्राथमिकहो
मानुवादेन प्रजापतिविधानात् न च विनिगमनाविरहादुभयविधानं युक्तमिति वाच्यम् विधिना हि तदेव विधेयं यत्प्रकारान्तरेणाप्राप्तं तत्र यथा
नेन वाक्येन सायंकालो न विधीयते सायं जुहोतीति वचनान्तरेण प्राप्तत्वात् तथाग्निरपि न विधीयते अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति मन्त्रवर्णादेव
प्राप्तत्वात् मन्त्रवर्णस्यापि देवतासमर्पकत्वमस्त्येव अतएवोपांशुयाजे विष्ण्वादीनां मान्त्रवर्णिकदेवतात्वमित्युक्तम् न चैवं प्रजापतिदेव
तयाग्नेर्बाधः स्यात् चतुर्थ्या हि प्रजापतेर्देवतात्वमवगम्यते अग्नेस्तु मान्त्रवर्णिकत्वं अस्यास्य देवतेति देवतात्वे तद्धितस्मरणवत् यद्यपि देवतात्वे
चतुर्थी संप्रदाने तस्याः स्मरणात् तथापि त्यज्यमानद्रव्योद्देश्यत्वं देवतात्वं तच्च संप्रदानस्वरूपान्तर्गतं त्यज्यमानद्रव्योद्देश्यत्वे सति प्रतिग्रही
तृत्वस्य संप्रदानत्वात् अतश्च चतुर्थीतः संप्रदानैकदेशतया देवतात्वप्रतीतिरस्त्येवं मन्त्रवर्णात् तु न देवतात्वं प्रतीयते किंत्वभिधानमात्रं अतश्च मन्त्रवर्णा
च्चतुर्थीतो दुर्बलः यथाहुः तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन चापुनः देवताया विधिस्तत्र दुर्बलं तु परंपरमिति अतश्च प्रबलप्रमाणबोधितप्रजापतिदेव
तया दुर्बलप्रमाणबोधिताग्नेर्बाधः स्यादिति चेत् सत्यम् स्याद्बाधो यदि प्रजापतये जुहोतीति केवलं प्रजापतिविधानं स्यात् विधीयमानस्तु प्रजापतिर्मन्त्र
वर्णप्राप्तमग्निमनूद्य तत्समुच्चितो [illegible] विधीयते समुच्चितोभयविधानापेक्षया अन्यतःप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिमात्रविधाने
लाघवात् अतश्च न बाधकत्वं निरपेक्षविधानाभावात् यथा चक्षुष्मत्तेऽग्निप्रजापत्योरेकहोमोद्देशेन विधानात् तुल्यार्थत्वेन विकल्पे प्रसक्ते
प्रजापतेर्नित्यान्तिकमग्निबाधकत्वं समुच्चयविधानात् एवं मन्त्रवर्णप्राप्तमग्निमनूद्य तत्समुच्चितप्रजापतिविधानेऽपि न बाधकत्वमिति तुल्यं
यत्तु अग्नेर्मान्त्रवर्णिकत्वे अग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति मिश्रलिंगमन्त्रवर्णबलात् सायंहोमस्य द्विदेवत्यापत्तिरिति तन्न अग्निसमुच्चितप्र-
जापतिविधानवत् सूर्यसमुच्चितस्य विधानात् प्रबलप्रमाणबोधितेन प्रजापतिना मन्त्रवर्णप्राप्तस्य सूर्यस्य बाधितत्वात् यत्तु अग्नेर्मान्त्रवर्णिकत्वे प्रजा

भयाविधानेवाक्यभेदाद्गौरवापत्तेश्चनानेनवाक्येनदेवताद्वयंविधीयतेकिंतुमंत्रप्राप्तमग्निमनूद्यतत्समुच्चितःप्रजापतिर्होमांशेन विधीयते अतश्च
नेदमग्नेःप्रापकं किंतुमंत्रवर्णएवअतश्चतेनाग्नेःप्राप्तत्वान्नाग्निहोत्रपदंदेवतासमर्पकं किंतर्हिनामधेयमेवेतिसिद्धमेतत्तत्प्रख्यशास्त्राद
ग्निहोत्रशब्दस्यकर्मनामधेयत्वमिति एवंप्रयाजेषुसमिदादिदेवतानांसमिधःसमिधोग्नआज्यस्यव्यंत्वित्यादिमंत्रवर्णैःप्राप्तत्वात् समिधोयज
तीत्यादिषुसमिधादिशब्दाःतत्प्रख्यशास्त्रात्कर्मनामधेयंयथाङ्गः विधित्सितगुणप्राप्तिशास्त्रमन्यद्यत्तदस्तिहितस्मात्तत्प्रापणंव्यर्थमितिनामधे
मिष्यतइतिदिक् श्येनेनाभिचरन्यजेतेत्यत्रश्येनशब्दस्यकर्मनामधेयत्वंतद्व्यपदेशशास्त्रात् तेनव्यपदेशउपमानंतदन्यथानुपपत्त्येतिया
वत् तथाहि यदि श्येनोद्रव्यंतस्यस्तुतिर्भवतीति यदिअत्रश्येनोविधेयःस्यात् तदार्थवादेतस्यैवस्तुतिःकार्या नचयथावैश्येनोनिपत्यादत्ते एवमयं
द्विषंतंभ्रातृव्यंनिपत्यादत्तइत्यनेनार्थवादेनश्येनःस्तोतुंशक्यःश्येनोपमानेनार्थान्तरस्तुतेःक्रियमाणत्वात् नचश्येनोपमानेनसएवस्तो
तुंशक्यतेउपमानोपमेयभावस्यभिन्नत्वात् यदातुश्येनसंज्ञकोयागोविधीयतेतदार्थवादेनश्येनोपमानेनतस्यस्तुतिःकर्तुंशक्यतइतिश्ये
नशब्दस्यतद्व्यपदेशाद्यागनामधेयत्वंतत्सिद्धं निमित्तचतुष्टयान्नामधेयत्वं उत्पत्तिशिष्टगुणबलीयस्त्वन्यायेन नामधेयत्वे निमित्तांके
विदाङ्गः वैश्वदेवेनयजेतेत्यत्रवैश्वदेवशब्दस्यकर्मनामधेयत्वमुत्पत्तिशिष्टगुणबलीयस्त्वात् उक्तान्मत्वर्थल[illegible]णादिप्रकारद्वयस्या
संभवात् तथाहि नतावन्मत्वर्थलक्षणाभयान्नामधेयत्वंवक्तुंयुक्तं वैश्वदेवेनेति हि तेनैवमत्वर्थलक्षणागौरवस्यास्यत्वात् साध्यदेवतेत्यस्मिन्न
र्थेहितद्धितस्मरणात्तत्रास्यशब्दस्यतद्धितांतर्गतस्यचतुर्थ्यन्तस्य [illegible] हविषोरितिस्मृतेः [illegible]
स्थितत्वाच्चिलात् स्तकहविषोऽस्मात्रानुपस्थितत्वाच्च नेतेत्युपस्थितंयागमेवास्यशब्दोऽभिधत्तेइति नमत्वर्थलक्षणाविश्वेदेवरूपैक
देवताविधानाच्चनवाक्यभेदः नापितत्प्रख्यशास्त्रान्नामधेयत्वं यत्रहिविधित्सितगुणोऽन्यतःप्राप्तः तत्रतत्प्रख्यशास्त्रान्नामधेयत्वंयथा
आग्नेयमष्टाकपालंनिर्वपतिसौम्यंचरुंसावित्रंद्वादशकपालं [illegible] मारुतंसप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथि
ग्निहोत्रशब्दे अत्रचाग्नेयादयोऽष्टौयागाःप्रकृताःतत्रामिक्षायागेपूर्वविधिविश्वेदेवाःप्राप्ताःवैश्वदेव्यामिक्षेति तथापिसप्तसुतेषाम

चकारबोधितः।

पाञ्चदातन्त्रेतियत्नः समुच्चयः क्रियागुणैः संबध्येत समुच्चयः शोभनः समुच्चयो दूष्यश्चेतिवत् चशोभनश्च दूष्यश्च इति प्रयोगः स्यात् समुच्चय
शब्दवत् चकारस्य प्राधान्येन समुच्चयवाचित्वे धवखदिरयोः समुच्चय इतिवत् धवखदिरयोश्चेत्यादिप्रयोगः स्यादिति अतश्चकारः समुच्चयं न प्रा
धान्येन ब्रूतेयेन प्रधानस्यैकस्य विधानान्न वाक्यभेदो भवेत् किंतु कारकद्वयोपसर्जनत्वेनैव स तं ब्रूते समुच्चितावग्निप्रजापती इति प्रधानद्वयवि
धाने च वाक्यभेदः स्यादेव यथाग्नेयोद्देशेन हंसमार्गैकत्वे विधाने यद्यपि च चकारः समुच्चयं प्राधान्येन ब्रूयात्तथापि तस्य कारकद्वयं प्रति
प्राधान्यमनुपपन्नं विभक्त्यभिहितस्य कारकद्वयस्य क्रियोपसर्जनत्वेन समुच्चयोपसर्जनत्वाभावात् इदं तादिशब्दे हि पोष्यंतं हि कारकं क्रि
यान्तेनान्येन संबध्यते कारकसमुच्चयः करणसमुच्चय इति विभक्त्यभिहितत्वे क्रियये च कारकांशात् येदान्वयात् अतश्चकारेणोच्यमानः स कारको
पसर्जनत्वेनैवोच्यते कारकद्वयं च प्रधानमेकोद्देशेन प्रधानद्वयविधाने वाक्यभेद एव यथाह अनेकपदसंबद्धद्वयं चेकमपि कारकं तथापि तद्वा
क्तेः प्रत्ययेन विधीयत इति यच्च यथा दक्षिणानुवादेन गवादीनामनेकेषां विधाने न वाक्यभेदस्तथा कारकद्वयविधानेपीति तन्न न हि गो
श्चाश्वश्चेत्यस्मिन्वाक्ये दक्षिणानुवादेन गवादयो विधीयंते तत्करीत्या वाक्यभेदापत्तेः चकारश्रवणेन कथंचित्परिहारेपि गवादीनामनेके
षां द्वादशशतसंख्यायाश्च विधाने वाक्यभेद एव आध्वर्यवप्रस्तावे गोश्चेत्यादेः तस्य द्वादशशतमित्यस्य स्पष्टमश्रुतत्वेन वाक्यैकवाक्यत्वमिति [illegible]
प्रामे अतोनेन वाक्येनोभयविशिष्टदक्षिणैव विधीयते विशिष्टविधानाच्च न वाक्यभेदः अतएव पार्थसारथिमिश्रैर्दशमे तत्रत्ते होभयविशिष्ट
दक्षिणैव विधीयते अनेकगवाद्यात्मिका दक्षिणा विधीयत इति चोक्तं न चैवं ऋत्विग्भ्यो दक्षिणां ददातीत्यस्यानर्थक्यं तस्यानुवादत्वात् ऋ
त्विक्संबंधपरत्वाद्वा दक्षिणाशब्दसामर्थ्याद्धि ऋत्विजां चमसाध्वर्य्वादीनां च तत्संबंधः स्यात् एतद्वाक्यसत्वे च न भवति ऋत्विकशब्दस्य व्र
त्यादिगणऋत्वयजननिमित्तत्वेन चमसाध्वर्युगण ऋत्विकत्वाभावस्य तृतीये उक्तत्वात् अतश्चोगोश्चाश्वश्चेत्यस्मिन्वाक्ये विशिष्टविधानान्नवा
क्यभेदः यदग्नये च प्रजापतये च सायं जुहोतीति तु न विशिष्टविधानं होमस्याग्निहोत्रं जुहोतीत्यनेन प्राप्तत्वात् अतश्च होमानुवादेन समुच्चितो

२२ दारूवागतः न [illegible] विधिरेवतत्प्रख्यशास्त्रंनार्थवादइत्यत्रकिंचित्प्रमाणमस्तिश्रुतएवज्योतिष्टोमेनस्वर्गकामोयजेतेत्यत्रज्योतिष्टोमपदव्युत्पत्तानिचायत्
तानिज्योतींषियस्तत्यस्तोमाइत्यर्थवादावगतज्योतिःसंबंधनिमित्तीकृत्यसोमयागेप्रवृत्तमानस्तत्प्रख्यशास्त्रान्नामधेयंभवतिएवंप्रकृ
ते पि [illegible] ख्यमपंचमप्रकारकल्पनेमाना[illegible]वात्तत्रतएववैश्वदेवाधिकरणेवार्तिककारैरेवमुपसंहृतमत्तत्प्रख्यत्वेपेवसर्वेषांनामधेयत्वमितिय
23 द्यौत्यत्तिशिष्टगुणवलीयस्त्वमुक्तंतद्गुणविध्यसंभवेयुक्तंयत्पुनर्द्रव्यमात्रमुत्तसिद्धतत्प्रख्यशास्त्राद्वैश्वदेवशब्दस्यकर्मनामधेयत्वमितितनुपपन्नं
सोमाधिकरणेऐंद्रवायवंगृह्णातीत्यादेनयजिकल्पनंसोमेनयजेतेतिप्रत्यक्षयजिष्कृते इत्युक्तंतेनन्यायेनवैश्वदेव्यामिक्षेत्यत्रापियजेकल्पनं
मात्तवैश्वदेवेनयजेतेत्यत्रप्रत्यक्षयजिश्रुतेः एवंचानेनवाक्येनदेवताविशिष्टकर्मविधानमस्तुतस्यचद्रव्याकांक्षायांवैश्वदेव्यामिक्षेति
द्रव्यविधानमस्तुएवंचनवा [illegible] हुयस्याप्यनुवादत्वेनाप्यष्टोहंवीषीत्यनन्यगतिकलिंगविरोधोभवेदितिचेत्मैवमवैश्वदेव्यामिक्षेत्यत्रय
ज्यकल्पनेस्त्वामिक्षाकिमनुवादेनविधीयतेविश्वेदेवानुवादेनद्रव्यविधानेद्रव्यस्यदेवतांगत्वमेवस्यान्नयागांगत्वम्किंचवैश्वदेवीशब्दा
देवतातद्धितांतत्वादामिक्षात्वेनवृत्तेरुक्तंतत्रचविश्वेदेवानुवादेनद्रव्यविधानेवैश्वदेवीशब्देनैववक्तव्यम् यद्भक्तेः[illegible]भावनायां
करणसमर्पणधातुनेवक्रियतेयदक्तेर्नतुयपदेनेत्युक्तंभावार्थाधिकरणेतद्वत्तत्रचवद्दकं [illegible] प्रथमभङ्गइतिवदेकप्रसक्ताविरो
धः श्रुतोयागानुवादेनापिद्रव्यविधानार्थंवैश्वदेव्यामिक्षेत्यत्रयजिकल्पनंतावदवश्यंकर्तव्यं ततश्चयथासोमाधिकरणेन्यायवैषम्यम् ऐंद्रवाय
वंगृह्णातीत्यत्रदेवताविशिष्टग्रहणविधानेनयज्यकल्पनात् यजिकल्पनेचवैश्वदेव्यामिक्षेत्येवदेवताविशिष्टकर्मविधानेयुक्तेन
ष्टहयश्रवणात्एवंचाग्नेयोष्टाकपालःसोमस्यव्रहीत्यादिवाक्यैर्वैश्वदेव्यामिक्षेत्येतस्यवाक्यस्यप्रायैः[illegible]तोरवृत्तिर्भवतिअन्यथाहितत्रशुष्ट
वेषु [illegible] देवतासंबंधकल्पितयागविधाने अत्रचद्रव्यमात्रविधानमितिवेदत्वप्रसज्येत् किंचवैश्वदेवेनयजेतेत्यत्रवैश्वदेवशब्दस्य
देवतासमर्पकत्वेयद्विश्वेदेवाःसमयजंततद्वैश्वदेवस्यवैश्वदेवत्वमित्यस्यार्थवादस्यात्यंतमेवानिरालंबनं [illegible] र्थवादाद्धि

किंविश्वेदेवादेवताकत्वेन

देवताविशि [illegible] मिक्षायागमात्रेसमर्पकत्वे

प्राप्तत्वाद्वैश्वदेवेनयजेतेत्यनेनतत्रतद्विधानेनतत्प्रख्यशास्त्रमन्यत्येनतद्व्यपदेशान्नामधेयत्वंस्यात्तन्न चामिक्षायागेष्वेवैतन्नामेतिवाच्यम् वैश्वदेवेनयजेतेति

वाक्यवैयर्थ्यापत्तेः वैश्वदेवशब्दस्यामिक्षायागमात्रनामत्वपक्षे यागो ऽनेनानूद्यतेइतिवाच्यम् नचतदनुवादेनात्तिकिंचित्कृत्यम् प्राचीनप्रवणे

वैश्वदेवसंबंधात्तस्याग्नेयाद्यष्टप्रकृतयागानामधेयत्वेतुनवैश्वदेवेनयजेतेतिवाक्यानर्थक्यं तदा ऽस्तिनत्वेऽष्टौयागाअनूद्यंते अनुवादेनचएकप्र

तीत्याहृदत्वात्समुदितानामष्टाना मपिवैश्वदेवशब्दोनामधेयंसिध्यति एवंचप्राचीनप्रवणेवैश्वदेवेनयजेतइत्यत्रवैश्वदेवशब्देनाष्टा

यागाननूद्यप्राचीनप्रवणविधानंतत्रासिद्धंभवति तद्वाक्यासत्वेनेनवाक्येनामिक्षायागएवप्राचीनप्रवणदेशसंबंधस्यात् अतएवाष्टस्वयागेषुप्राचीनप्रवणदे

शसंबंधएवैतद्वाक्यप्रयोजनं एवंचवैश्वदेवशब्दो ऽष्टानांनामधेयंनेन तत्प्रख्यशास्त्रं निमित्तंभवति तत्रहिविश्वेदेवागुणः श्रुतौ नवैश्वदेवश

ब्दस्यतत्प्रख्यशास्त्रान्नामधेयत्वमितिनापितद्व्यपदेशात् तादृशस्यव्यपदेशस्यानुपलंभात् अतश्चवैश्वदेवशब्दस्यनामधेयत्वेतत्प्रकारच

तुष्टयस्यानिमित्तत्वादुत्पत्तिशिष्टगुणबलीयस्त्वमेवनिमित्तं तथाहिवैश्वदेवेनयजेतेत्यत्रनतावदप्रकृतकर्मानुवादेनदेवताविधानंसंभवतितेषाम

त्रानुपस्थितेः नापिदेवताविशिष्टकर्मान्तरविधानंसंभवतिगौरवापत्तेः अग्नेहंवीषीत्यनन्यगतिकलिंगविरोधाच्चा ऽतो ऽनेनवाक्येनप्रकृतकर्मानु

वादेनविधीयंतेइतिवक्तव्यम् तत्रामिक्षायागेविश्वेदेवप्राप्ते समस्तस्वयागेष्वनेनवाक्येनविश्वेदेवाविधीयंतेइतिवक्तव्यम् नचतत्संभवति तेषामुत्पत्ति

शिष्टाग्न्यादिदेवतावरोधात् आकांक्षायाहिसंबंधोभवति आग्नेयादियागानांहिदेवताकांक्षाउत्पत्तिशिष्टै रग्न्यादिभिरेवनिवृत्तेतिनतत्रविश्वेदेवविधा

नंयुक्तं अतश्चोत्पत्तिशिष्टगुणबलीयस्त्वाद्वैश्वदेवशब्दस्यकर्मनामधेयत्वमितियथाहुः गुणांतराचरुद्धत्वान्नाचकार्य्यो गुणोपरः विकल्पा

पिनेवैषस्यात्तस्मान्नामैवयुज्यतइतिअन्येत्वाचार्य्याआहुः यःशब्दोयत्रकर्मणियद्गुणसंबंधं बोधयतिसचेत्संबंधः शास्त्रांतरप्राप्तिर्यन्नस्ततदातस्य

शब्दस्यतन्नामधेयत्वंतत्प्रख्यशास्त्रात्तत्त्वशास्त्रांतरं विधिर्वार्थवादोवेत्यत्रानादरः तत्राग्निहोत्रशब्दो ऽग्निसंबंधबोधकं शास्त्रांतरं विधिरेव

वैश्वदेवशब्दश्चविश्वेदेवसंबंधंकर्मणां बोधयति विश्वेदेवसंबंधश्चाष्टस्वयागेषुयद्विश्वेदेवाःसमयजंतततद्वैश्वदेवस्यवैश्वदेवत्वमित्यर्थवा

ननुवैश्वदेवेनयजेतेत्यस्यदेवतादिविशिष्टयागांतरविधायकत्वेपिनगौरवंप्रकृतवैश्वदेवकर्मण्येवाग्नेयादिवत् विधानेनाप्रकृतकल्पनाभावा

२४ तिविधिवाक्यश्रवणोऽयं मां प्रवर्त्तयतीति वन्निषेधवाक्यश्रवणोऽयं मां निवर्त्तयतीति निवृत्यानुकूलव्यापारनिवर्त्तनायाः प्रतीतेः अतः सर्वत्र निषेधे
धुनिवर्त्तनेव वाक्यार्थः एवं च विधिनिषेधयोर्भिन्नार्थत्वं सिद्धं भवति हननादिवर्जनं कर्त्तव्यता वाक्यार्थः पक्षे तु कर्त्तव्यताया एवोभयत्र प्रतिपाद्यत्वा
त्तयोरेकार्थत्वं स्यात् तस्मान्न युक्तमयं पक्षः अत एवाहुः अंतरं यादृशं लोके ब्रह्महत्याश्वमेधयोः दृश्यते तादृगेवेदं विधानप्रतिषेधयोरिति तथा फलबुद्धिप्र
मेयाऽधिकारिबोधकभेदः ततः पंचधात्यंतभिन्नत्वाद्भेदो विधिनिषेधयोरिति यन्मते इष्टसाधनत्वं लिङर्थस्तन्मते लिङः संसृष्टो नञ इष्टसाधन
त्वप्रतिपत्तिमनिष्टसाधनत्वं गमयति सर्वव्यापिनञः प्राधान्यात् प्रत्ययेनान्वयः यदा तु तदन्वये किंचिद्बाधकं तदा गत्या धात्वर्थेनान्वयः तच्च बा
24 धकं द्विविधम् तस्य व्रतमित्युपक्रमो विकल्पप्रसक्तिश्च अनेन च बाधकद्वयेन नञ्युक्तेषु वाक्येषु पर्युदासाश्रयणं भवति तदभावे निषेधः ए
व पर्युदासः सविज्ञेयो यत्रोत्तरपदेन नञः प्रतिषेधः सविज्ञेयः क्रियया सह यत्र नञ् इति च तयोर्लक्षणम् तत्र नेक्षेतोद्यंतमादित्यमित्यादौ पर्युदा
साश्रयणं तस्य व्रतमित्युपक्रमात् तथा हि व्रतशब्देन कर्त्तव्यार्थ उच्यते अतश्च स्नातकस्य कर्त्तव्यार्थानां वक्तव्यत्वेनोपक्रमात् किं तत्कर्त्तव्य
मित्यपेक्षायाम् अग्रे नेक्षेतोद्यंतमित्यादौ कर्त्तव्य एवार्थो वक्तव्यः आकांक्षिताभिधानात् अर्थांतरोक्तौ च पूर्ववाक्यस्य साकांक्षत्वेनाप्रामाण्य
पर्युदस्तवत्त्व
प्रसंगात् न हि कर्त्तव्यत्वेनोपक्रमे अग्रे च तदनभिधाने पूर्ववाक्यस्य निराकांक्षत्वं भवति न च साकांक्षस्य प्रामाण्यं गौरश्वः पुरुषहस्त्यादावपि
प्रसंगात् किंच नेक्षेतेत्यस्योपक्रमेण प्रतीयमानैकवाक्यता च न स्यात् अर्थांतरोक्तेः अतश्चास्मिन्वाक्ये किंचित्कर्त्तव्य एवार्थो वक्तव्यः
तदुक्तौ च न नञः प्रत्ययेन संबंधो घटते तत्संबंधे कर्त्तव्यार्थोक्तेरनुपपत्तेः प्रत्ययार्थभावनारहितो नञ् धातुना संबध्यते तत्संबंधे च न नञः प्रति
षेधकत्वं तयोरविधायकत्वात् यथाहुः नामधात्वर्थयोगी तु नैव नञ् प्रतिषेधकः वदत्यब्राह्मणाधर्मावन्यमात्रविरोधिनाविति अतश्च ने
क्षेतेत्यत्र नञो धातुयोगान्नञीक्षणविरोधीक्षणनार्थः प्रतिपाद्यते न तु तदन्यत्वं हि नञस्तदभावे तु नञ इति सत्यपि स्मरणे नञ
ः स्वसंबद्धस्याभावस्य च शक्तिर्लाघवात् न तु तदन्यत्वं हि नञ्द्वयोः तयोर्भावघटितत्वेन गौरवात् अनेकार्थत्वस्य चान्याय्यत्वात् अतो नञो

तत्पूर्वोक्तंज्ञानं। अपूर्वहविःसंप्रदानकर्मणि।

वैश्वदेवशब्दोविश्वेदेवकर्तृकत्वेनकर्मणिप्रवृत्तइतिज्ञायतेतद्देवतासमर्पकत्वेविरुध्यतेकिंचवैश्वदेवेनयजेतेत्यस्ययागविधित्वेआमिक्षा
यागेनोत्पत्तिशिष्टत्वंतथाचतत्स्थानवाजिनंबाधितुंशक्यतेइतिउभयोरप्यामिक्षावाजिनयोर्यागांगत्वंस्यात्तथाचविकल्पःसचाष्टदोषदुष्टइ
तितस्माद्वैश्वदेव्यामिक्षेत्यत्रैवयागविधानंइतरस्यत्वनुवादत्वंअनुवादत्वेपदानामानर्थक्यंतथोक्तमित्याहोताचत्तत्सिद्धंवैश्वदेवशब्दस्य
कर्मनामधेयत्वंतदेवंनिरूपितंमत्वर्थलक्षणाभयादिप्रकारचतुष्टयंनिरूपितंनामधेयस्यविधेयार्थपरिच्छेदकतयार्थवत्त्वंअनर्थहेतुकर्मणः
सकाशात्पुरुषस्यनिवृत्तिकरत्वेननिषेधानांपुरुषार्थानुबंधित्वंतथाहियथाविधयःप्रेरणामभिदधतःस्वप्रवर्तकत्वनिर्वाहार्थंविधे
यस्ययागादेःश्रेयःसाधनत्वमाक्षिपंतःपुरुषंतत्रप्रवर्तयंतिएवंनकलंजंभक्षयेदित्यादयोनिषेधाअपिनिवर्तनामभिदधतःस्वनिवर्तकत्वनि
र्वाहार्थंनिषेध्यस्यकलंजभक्षणादेरनर्थहेतुत्वमाक्षिपंतःपुरुषंततोनिवर्तयंतिननुकथंनिषेधानांनिवर्तनाप्रतिपादकत्वं।नकलंजंभक्षये
दित्यादौआख्यातव्यवधानेननञर्थस्याभावस्यधात्वर्थेनान्वयेधात्वर्थवर्जनकर्तव्यतेववाक्यार्थःप्रतीयतेयथायजेतेत्या
दौयागकर्तव्यतावाक्यार्थःएवंनिषेधेतत्तद्धात्वर्थवर्जनकर्तव्यतावाक्यार्थोननिवर्तनेतिचेत्मैवम्अव्यवधानेपिधात्वर्थस्यप्रत्ययार्थो
पसर्जनत्वेनोपस्थितस्यनञर्थेनान्वयायोगात्नह्यन्योपसर्जनमन्येनान्वेतिमाभूद्राजपुरुषमानयेत्यत्रराज्ञआनयनान्वयित्वंतत्रव्यव
धानेपिनञर्थस्यनधात्वर्थेनान्वयःआख्यातस्यैवैकत्वाद्यन्यानपेक्षलिंगादिपदार्थैरन्वयःतेषामपिकारकोपसर्जनतयोपस्थितत्वेनभिन्न
पदस्यनञोर्थेनान्वयायोगात्एकत्वादेश्चाख्यातेनाप्युक्तत्वाच्चान्येनान्वयायोगान्नञर्थःप्रत्ययार्थेनसंबध्यतेतस्यप्राधान्यात्क्रियाभावन
यैवाख्यातत्वापादिनीतत्रापिनाख्यातांशवाच्यपार्थभावनयातस्यात्अपिलिंङ्त्वांशवाच्यप्रवर्तनोपसर्जनत्वेनोपसर्जनत्वेनोपस्थितत्वात्अतो
लिङ्त्वांशेननञ्संबध्यतेतस्यसर्वापेक्षयाप्राधान्यात्नञश्चस्वभावोयत्स्वसंबंधिप्रतियोगिबोधकत्वम्नास्तीत्यत्रसत्तेतिसत्त्वशब्दे
नसंबध्यमानोनञ्सत्त्वप्रतीपंतदसत्त्वंगमयतीतितद्वदिहलिङर्थस्ताचत्प्रवर्तनात्वेनसंबध्यमानोनञ्प्रवर्तनाप्रतिपक्षंनिवर्तनांगमय

किंतु दलनादौ प्रवृत्तं प्रत्येवं न हन्यादिति शास्त्रं हननात्त्वयं निवृत्तपुरुषं प्रति न प्रवर्त्तते वैयर्थ्यात् २
ते स्वयं प्रवृत्तं पुरुषं प्रति न प्रवर्त्तते वैयर्थ्यात् किंतु हनने प्रवृत्तं पुरुषं प्रति कर्त्तव्यत्वेन प्रसक्तस्य प्रतिषेधात् यत्कर्त्तव्यं तन्नेति अतश्च प्राप्तिसापे।
क्षत्वात्प्रतिषेधानाम् अनुयाजेषु येयजामहप्रतिषेधे तस्य तत्प्राप्तिर्वक्तव्या सा न तावद्धननादाविव रागतः संभवति अतो यजतिषु येयजामहं क
रोतीति शास्त्रात्सा वक्तव्या शास्त्रप्राप्तस्य च प्रतिषेधे विकल्पः स्यात् शास्त्रेण भ्रान्तिनिमित्तरागस्येव शास्त्रं तत्स्यात् तत्तवाधप्रयोगात् न च प
देशास्त्रेणाहवनीयशास्त्रस्येव नानुयाजेष्विति विशेषशास्त्रेण यजतिषु येयजामहं करोतीति सामान्यशास्त्रस्य वाधः स्यादिति वाच्यम् शा
स्त्रयोर्हि तत्र वाध्यवाधकभावो यत्र परस्परं निरपेक्षता न हि यदशास्त्रस्य स्वार्थविधानार्थमाहवनीयशास्त्रापेक्षास्ति निषेधशास्त्रस्य तु प्र
सक्त्यर्थं यजतिषु येयजामहं करोतीति विधेरस्त्यपेक्षा एवं च निषेधशास्त्रस्य विशेषविषयत्वेन प्राबल्यवत् विधिशास्त्रस्यापि तदुपजीव्यत्वेन कारण
प्राबल्यमस्तीति न निषेधेन विधेरत्यन्तवाधो युक्त इति विहितप्रतिषिद्धत्वाद्विकल्पः स्यात् स च न युक्तः विकल्पे हि पक्षे शास्त्रस्याप्रामाण्यं त्वेन ६
भवति न स्वनुयाजेषु येयजामहकरणे नानुयाजेष्वित्यस्य प्रामाण्यं पक्षे भवति त्रीस्वनुष्ठानसमयपक्षे च यत्र शास्त्रस्य द्विरदृष्टकल्पना च स्यात् विधे
र्हि एवं ज्ञायते यत् अनुयाजेषु येयजामहकरणे कश्चनोपकारो भवतीति निषेधात्तु तदकरणादिति ज्ञायते अनृतवदनाकरणादिव दर्शपूर्णमास
योः स चोपकारो ऽदृष्टरूप इति द्विरदृष्टकल्पनाप्रसंगः अतश्च विकल्पो न युक्तः प्रतिषेधाश्रयणे च तदायत्तेर्न तदाश्रयणम् किंतु नञः अनुयाजशब्दे
न संबंधमाश्रित्य पर्युदासः आश्रीयते नञनुयाजशब्दाभ्याम् अनुयाजव्यतिरिक्तलक्षणात् अनुयाजव्यतिरिक्तेषु येयजामहं करोतीति अत्र च वाक्ये येय
जामहः कर्त्तव्यतया न विधीयते यजतिषु येयजामहं करोतीत्यनेनैव विहितत्वात् किंतु सामान्यशास्त्रविहितयेयजामहस्यानुवादेन अनुयाजव्यतिरिक्त
विषयसमर्पणान्नानुयाजेष्विति वाक्यस्य नाप्रामाण्यं पक्षे अतश्च पर्युदासाश्रयणे न किंचिद्बाधकं तस्मिन् नानुयाजेष्विति वाक्ये विकल्पभयात्पर्युदासा
श्रयणमिति न तु पर्युदासाश्रयणे यजतिषु येयजामहं करोतीति शास्त्रेण सामान्येन प्राप्तस्य येयजामहस्य अनेन नानुयाजेष्वित्यनेनानुयाजव्यतिरिक्ते

प्रदेशान्तैन्त्यशैनशास्त्रेणाहवनीयेत्र
द्वैकैतिशास्त्रचैकल्पसमर्थः ४

25

नाम १

घातयोगे धात्वर्थाभावबोधकत्वमेव न तु तद्भिन्नार्थबोधकत्वमिति चेत्सत्यम् नञो ऽभावएव शक्तिः स्मरणं तु प्रतीत्यभिप्रायं न शक्त्यभिप्रायम् [illegible] धा
त्वर्थयोगीत्यपि प्रतीत्यभिप्रायं तथापि नेक्षेतेत्यत्र प्रत्ययस्य नञा ऽसंबंधात्तेन तावत्कश्चिदर्थो विधेयः तत्र न तावद्धात्वर्थो विधातुं शक्यते नञा तदभा
वबोधनात् नापि तदभावो विधातुं शक्यते अभावस्याविधेयत्वात् अतश्च नञीक्षितिभ्यां विधानयोग्यः कश्चन ईक्षणविरोधी अर्थो लक्षणया
प्रतिपाद्यते स चेक्षणविरोधी लक्ष्यमाणः यदार्थो नेक्षेतेति अनीक्षणसंकल्पः तस्येक्षणविरोधित्वात् सत्यपि पदार्थान्तरस्येक्षणविरोधित्वे सर्वक्रि
यासु विनाभूतत्वेन संकल्पस्यैव लक्षणा स एव नेक्षेतेत्यत्र कर्तव्यतया विधीयते अनीक्षणसंकल्पेन भावयेदिति भाव्याकांक्षायां चेतावता हेनसा
विमुक्तो भवतीति वाक्यशेषावगतः पापक्षयो भाव्यतया संबध्यते एवं चात्र यथा पद [illegible] यार्थसंकल्पस्य कर्तव्यतया विधानात्तस्य व्रतमित्य
नेनैकवाक्यता सिद्धा भवति तस्मिन्नेक्षेतेत्यत्र तस्य व्रतमित्युपक्रमात्पर्युदासाश्रयणमिति नानुयाजेषु येयजामहं करोतीत्यत्र विकल्पप्र
सक्त्या तदाश्रयणं तथा हि यद्यत्र प्रधानसंबंधलोभान्नञः प्रत्ययसंबंधः स्वीक्रियेत तथा सत्यनेन वाक्येन नानुयाजेषु येयजामहः प्रतिषिध्यत इति
वक्तव्यम् अनुयाजेषु येयजामहं न कुर्यादिति न च तत्र तस्य प्रतिषेधः प्राप्तिं विना संभवति प्राप्तिसापेक्षत्वात्प्रतिषेधस्य अत एव नांतरिक्षे न दिवी
त्यस्य न प्रतिषेधकत्वं अंतरिक्षे च यज्ञाप्राप्तेः अत एव न ब्राह्मणो हंतव्य इत्यस्य नित्यवद्धनननिवर्तकत्वमुपपद्यते सर्वो हि पुरुषः कदाचिद्ध दो
ननेदोप्रवर्तते कदाचिद्रागाद्यभावेन प्रवर्तते तत्र यदि निषेधस्य प्राप्तिसापेक्षत्वं न स्यात् तदा रागाविरोधाय हननादावप्रवृत्तं प्रत्येव
न शास्त्रप्रामाण्यमापद्येत रागादिना हनने दोप्रवृत्तेन पुंसा न ततो निवर्तितव्यं प्राप्तिसापेक्षत्वे तु स्वयमप्रवृत्तं प्रतिप्रसक्त्यभावेन निषेधशास्त्रा
प्रवृत्तेः रागादिना प्रवृत्तं प्रत्येव भ्रांतिनिमित्तरागबाधेन निषेधशास्त्रप्रवृत्तेः युक्ताप्रवृत्तस्य ततो निवृत्तिः अतश्च ब्राह्मणो न हंतव्य इत्यस्य निषे
धस्य निवृत्तिनियमबोधकत्वं व्रीहीनवहन्यादित्यस्येवावघातनियमबोधकत्वं यथा खलु व्रीहीनवहन्यादिति शास्त्रं वैतुष्यार्थमवघा

पर्युदासः विकल्पप्रसक्त्ये

तत्सिद्धं नानुयाजेष्वित्यत्र विकल्पप्रसक्त्या पर्युदासाश्रयणमिति यत्र तु स आश्रयितुं न शक्यते तत्र तत्प्रसक्तावपि निषेध एवाश्रीयते यथा नाति
रात्रे षोडशिनं गृह्णातीत्यत्र अत्र ह्यतिरात्रे षोडशिनं गृह्णातीति शास्त्रेण प्राप्तं अतिरात्रे षोडशिग्रहणं प्रतिषिध्यत इति विहितप्रतिषिद्धत्वा
द्विकल्पप्रशक्तावपि पर्युदासो नाश्रीयते अशक्यत्वात् यदि ह्यत्र नञः षोडशिपदेन संबंधः स्वीक्रियेत तदा अतिरात्रे षोडशिव्यतिरिक्तं गृह्णातीति
वाक्यार्थः स्यात् तत्र चातिरात्रे षोडशिनं गृह्णातीति प्रत्यक्षविधिविरोधः अतएव चातिरावातिरात्रपदेन नञः संबंधो नातिरात्रे षोडशिनं ग
ह्णातीति प्रत्यक्षविधिविरोधात् अतश्चात्र पर्युदासस्यानुपपत्तेर्निषेध एव स्वीक्रियते विकल्पोपि स्वीक्रियते अनन्यगतेः अतश्चैतत्सिद्धं य
त्र तस्य व्रतमित्याद्युपक्रमो विकल्पप्रसक्तिश्च नास्ति तत्र प्रतिषेधो यथा न कलिंजं भक्षयेदिति यत्र वा विकल्पप्रसक्तावपि पर्युदास
26 आश्रयितुं न शक्यते तत्र प्रतिषेधः यथा नातिरात्रे षोडशिनं गृह्णातीति एतावांस्तु विशेषः यत्र विकल्पापादकः प्रतिषेधः तत्र प्रतिषि
ध्यमानस्य नानर्थहेतुत्वं उभयोरपि विधिनिषेधयोः क्रत्वर्थत्वात् यत्र च न विकल्पः प्रसज्यते प्राप्तिश्च रागतः प्रतिषेधश्च पुरुषार्थस्त
त्र निषिध्यमानस्यानर्थहेतुत्वं यथा कलंजभक्षणाद्यादौ चितो नञ्सोतीत्यादिकृत्तदमहोमादीनां शास्त्रप्राप्तावपि पुरुषार्थत्वेन प्राप्त
त्वात् क्रत्वर्थत्वेन प्रतिषेधे तदनुष्ठानात् क्रतौ वैगुण्यं न त्वनर्थोत्पत्तिः यथा स्वस्त्युपगमनादिप्रतिषेधे रागतः प्राप्तस्य पुरुषार्थत्वेन प्रति
षेधे निषिध्यमानस्यानर्थहेतुत्वं इति दिक् तत्सिद्धं निषेधानां पुरुषार्थानुबंधित्वं एवं सर्वस्यापि वेदस्य पुरुषार्थानुबंधित्वं प्रकृतमनु
सरामः तदेवं यथा विध्यादीनामध्ययनविध्युपात्तानां नानर्थक्यं एवमर्थवादानामपि तदुपात्तत्वेनानर्थक्यानुपपत्तेः स्वार्थप्रतिपादनेन च
प्रयोजनाभावात् लक्षणया प्रयोजनवदर्थपर्यवसानं वक्तव्यं ते चार्थवादा द्विविधाः विधिशेषा निषेधशेषाश्च तत्र वायव्यं श्वेतमालभेते
त्यादिविधिशेषाणां वायुर्वै क्षेपिष्ठा देवतेत्यादीनामर्थवादानां विधेयार्थस्तावकतयार्थवत्त्वं बर्हिषि रजतं न देयमित्यादिनिषेधशेषा.

अध्ययनविध्युपात्तत्वेन

वायुदेवताकं श्वेतालंभनेन यागं भावयेदिति वाक्यार्थः ३ तेद्यामात्तु च बर्हिषि हिरण्यं निधाय तद्ब्राह्मणे
भ्यो देयं न तत्र रजतं देयमिति २

संकोचनात्पर्युदासस्योपसंहारादभेदः स्यात् उपसंहारे हि सामान्यप्राप्तस्य विशेषे संकोचो भवति यथा पुरोडाशं चतुर्द्धा करोतीति पुरोडाशसामान्ये
प्राप्तं चतुर्द्धाकरणं आग्नेयं चतुर्द्धा करोतीति आग्नेये संकोच्यते इति चेत् न तन्मात्रसंकोचार्थत्वादुपसंहारस्य तदन्यमात्रसंकोचार्थत्वात्पर्युदा
सस्येति केचित् अन्ये तु उपसंहारो नाम सामान्यतः प्राप्तस्य विशेषे संकोचनरूपो व्यापारविशेषो विधेः पर्युदासस्तु पर्युदासः स चिन्त्येयो यत्रोत्तर
पदेन नञ् इति अभियुक्तोक्त्या प्रत्ययातिरिक्तेन धातुना नाम्ना वा नञः संबंधः अतस्तयोस्तावत्स्वरूपतः स्वरूप एव भेदः एवं स[illegible]त्यप्यभेद
आशंक्येत यदि पर्युदासः विहितस्तत्रावश्यं उपसंहारः स्यात् न चेतदस्ति नेक्षेतोद्यन्तमित्यादौ सत्यपि तस्मिन्नुपसंहाराभावात् न हि तत्राग्ने
ये चतुर्द्धाकरणमिव सामान्ये प्राप्तं किंचिद्विशेषे संकोच्यते यथा च तयोर्द्वेषेनानीक्षणासंकल्पमात्रविधानात् प्रकृतोदाहरणे तु यजिसामा
न्ये प्राप्तस्य येयजामहस्यानुयाजव्यतिरिक्तेषु संकोचनाद्युदिविधेरुपसंहारविधित्वं भवति नैतावता किंचिद्विरुध्यते विध्यभेदे हि कथं विधि
कार्यमुपसंहारः पर्युदासेन क्रियत इति भवति विरोधः न चात्र विधिर्नास्ति नञोनुयाजपदसंबंधेन विधेर्विधायकत्वस्याव्याघातात् अत्र हि प
र्युदासेनानुयाजव्यतिरिक्तविषयसमर्पकः आग्नेयपदवत् उपसंहारकस्तु विधिरेव न चात्र तन्मात्रसंकोचाभावान्नोपसंहार इति वाच्यम्
तन्मात्रसंकोच इति कोर्थः आग्नेयमात्रे संकोचो वा सामान्यप्राप्तस्य विशेषमात्रसंकोचो वा आद्ये नमस्यापाधीतसात्तद्रूपस्यमित्रविंदादि
प्रकरणस्थेन वाक्येनोपसंहारो न स्यात् आग्नेये संकोचाभावात् द्वितीये चतुर्द्धाकरणस्य पुरोडाशमात्रे प्राप्तस्याग्नेयसंकोचवत् अनुया
जाननुयाजसाधारण्येन प्राप्तस्यानुयाजेषु संकोचादुपसंहारः स्यादेव एतावांस्तु विशेषः आग्नेयादिवाक्येषु आग्नेयादयो विशेषाः स्व
पदोपस्थापिताः प्रकृते तु पर्युदासेन तस्योपस्थितिरिति उपसंहारन्यायस्तु विशेषः एवं च यत्तु तदन्यमात्रसंकोचनार्थत्वात्पर्युदासस्येति तन्न
नेक्षेतेत्यत्र सत्यपि पर्युदासे संकोचाभावात् न ह्यत्र सामान्ये प्राप्तं तदन्यमात्रे संकोच्यते संकल्पमात्रविधानादित्युक्तमित्यास्तां तावत्
याजव्यतिरिक्तरूपस्य विशेषस्येत्यर्थ

र्लक्षणायेवएवंचवैदिकःलिङादिश्रवणेपिप्रवर्त्तनासामान्यमेवप्रतीयते तत्र कोसौ व्यापारइत्यपेक्षायांप्रेषादिरूपस्यवक्रभिप्रायस्यायो
रुषेयेवेदेऽनुपपत्तेः शब्दनिष्ठएवप्रेरणापरपर्यायःकश्चित्व्यापारइतिकल्प्यतेअतएवशब्दनिष्ठाएवप्रेरणापरपर्यायोव्यापारःशाब्दी
भावनासैवचप्रवर्त्तनात्वेनरूपेणविध्यर्थइतिकल्प्यतेनार्थोऽभिधाभावनामाहुरन्यामेवलिङादयइतिवार्तिकस्य अभिधीयतेऽनेनेतिव्युत्प
त्त्याअभिधाशब्देनशब्द उच्यतेतद्व्यापारात्मिकाभावनालिङादिवाच्येतिकेचिदाहुः अन्येत्वाहुः सत्यंप्रवर्त्तनासामान्यंविध्यर्थःतथैवा
ऽक्तिगृहात्प्रवृत्त्यनुकूलश्च व्यापारःप्रवर्त्तनाअपौरुषेयेचवेदेप्रेषादेरसंभवात्कश्चित्पुरुषेप्रवृत्त्यनुकूलोव्यापारविशेषःकल्पनी
यः विधिशब्दाभिधेयप्रवर्त्तनासामान्यस्यविशेषमंतरेणापर्यवसानात् तत्रकोसोव्यापारइत्यपेक्षायांधात्वर्थगतंसमीहितसाधनत्व
मेवेतिकल्प्यतेतस्यापिप्रवृत्त्यनुकूलत्वात्सर्वेहिसमीहितसाधनतांज्ञात्वाप्रवर्त्ततेअन्यप्रेरितोपिपदीष्टसाधनतांनजानातितदानैवप्र
वर्त्ततेस्वतंत्रप्रेरणावादेपितदावेत्समीहितसाधनताज्ञानंस्वीक्रियतएवाअन्यथाविधेःप्रवर्तकत्वानुपपत्तेःअतइष्टसाधनत्वस्य
समीहितसाधनत्वेचप्रवर्त्तनात्वेनरूपेणविध्यर्थःएवंचविधिशब्दस्यान्यनिष्ठव्यापारबोधकत्वेलोकसिद्धेसिद्धेनवैदिकेचशब्दस्यकोप
व्यापारःसंप्रदायअतिरिक्तःकल्पनीयःतस्यचस्वप्रवृत्तौपराधीनत्वेनाकारणत्वेनाऽत्यप्रवर्तनात्वेन...नप्रवृत्त्यनुकूलत्वेशब्दस्य
प्रेरणनिष्ठव्यापारज्ञापकत्वेनस्वतस्यस्वनिष्ठव्यापारबोधकत्वेविधेश्चप्रवर्तकत्वनिर्वाहार्थंधात्वर्थस्यसमीहितसाधनत्वमितिकल्प्य
नादरमावश्यकस्येकसमीहितसाधनत्वस्यस्वप्रवृत्तिहेतुत्वेनस्वात्मप्रवर्त्तनात्वेनरूपेणविध्यर्थत्वकल्पनंलाघवात्अन्यनिष्ठव्या
पारंनचविधेःप्रवर्तकत्वनिर्वाहार्थंसमीहितसाधनत्वकल्पनात्प्रेरणानभिधानेचविधेःप्रवर्तकत्वाभावाद्धात्वर्थस्यसमीहितसाध
नत्वकल्पकत्वमेवनास्तीतिवाच्यम् प्रवर्त्तनाभिधानेनैतन्मतेपिविधेःप्रवर्त्तकत्वात् विध्यभिहितस्यचप्रवर्त्तनासामान्यस्यविशे

णां होरोदीदित्यादीनामर्थवादानां तन्निषेध्यनिंदकतयेति अत एव लक्षणया प्राशस्त्यमर्थवादैर्बोध्यते तत्तत्प्राशस्त्यज्ञानं शाब्दभा
वनायामितिकर्त्तव्यतात्वेन संबध्यते परमप्रकृतं तत्सिद्धं वस्तु आराध्यभावं भाव्यका लिङादिज्ञानकरणिका प्राशस्त्यज्ञानेतिकर्त्तव्य
तांका शाब्दीभावना लिङादि वाच्यांशेनोच्यते इति न तु केवलं शाब्दीभावना उच्यते पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः स एव विध्यर्थः लिङादिश्रवणे ऽयं मा
प्रवर्त्तयतीति तत्तस्य नियमेन प्रतीतेः यत्तु इष्टसाधनत्वं विध्यर्थ इति तन्न तथा हि इष्टसाधनमिति शब्दस्य विधिशब्दः पर्यायः स्यात् न च पर्यायत्वं युज्य
ते संध्योपासनं ते इष्टसाधनं तस्मात्त्वं कुर्विति सहप्रयोगात् पर्यायाणां च सहप्रयोगाभावात् अतः प्रव्यापार विशेष एव विध्यर्थः स च लोके
मरूषनिष्ठो ऽभिप्रायविशेषः वेदे तु पुरुषाभावात् शब्दनिष्ठ एव प्रेरणापरपर्याय इत्युक्तं न तु लोके शब्दनिष्ठप्रेरणापरपर्याये व्यापा
२४ रे शब्दप्रयोगाभावेन शक्तिग्रहाभावात् कथं तस्य विधिशब्दात्प्रतीतिरिति चेत् सत्यमेवं तथापि बालस्तावत् स्तनपानादौ स्वकृतेष्टसाध
नादिजनितमातृप्रवृत्तेः स्वाभिप्रायरूपप्रवर्त्तनाज्ञानजन्यत्वावधारणात् स विकल्पकप्रयोजकवाक्यश्रवणसमनंतरभाविनीं प्रयोज्य
वृद्धप्रवृत्तिमुपलभ्य तत्कारणत्वेन तस्य प्रवर्त्तनाज्ञानमनुमिमीते यद्यपि भोजनादौ स्वप्रवृत्तेः समीहितसाधनताज्ञानपूर्वकत्वावधार
णात् प्रयोज्यवृद्धप्रवृत्तेरपि तत्पूर्वकत्वाध्यवसानं युक्तं तथाप्यन्यप्रेरितप्रवृत्तौ प्रवर्त्तनाज्ञानजन्यत्वस्योक्तमातृप्रवृत्तौ दर्शनेन प्रयो
ज्यवृद्धप्रवृत्तेरपि अन्यप्रेरितप्रवृत्तित्वात् तत्कारणत्वेन प्रवर्त्तनाज्ञानस्यैवाध्यवसानं तच्च प्रवर्त्तनाज्ञानमन्वयव्यतिरेकाभ्यां प्रयोजकवा
क्यजन्यमित्यवधारयति तत्र चावापोद्वापाभ्यां प्रवर्त्तनायां विधिशक्तिमवधारयति प्रवृत्त्यनुकूलो व्यापारः प्रवर्तना स च व्यापारः प्रेषा
दिरूपो विधिरिति प्रत्येकं व्यभिचारित्वाद्विधिशब्दवाच्यत्वानुपपत्तेः प्रवर्त्तनासामान्यमेव विधिशब्दवाच्यमिति कल्पयति एवं च वि
धिश्रवणे प्रेषादिरूपस्य वक्तुरभिप्रायस्य प्रवर्त्तनात्वेनैव रूपेण प्रतीतिर्न विशेषरूपेण तथैव शक्तिग्रहात् विशेषरूपेण तु प्रतीति
नौ ।